[२.१.२]अथवा ***ञिभींक् भये*** [**सिद्ध.धातु.११३२**] अग्ने[2]र्बिभेतीति विग्रहे, क्विपि, तस्य लोपे, [3]अग्निशब्दस्य भीशब्देन सह ***डस्युक्तं कृता*** [**सिद्धहेम.३।१।४९**] इति तत्पुरुषे, तथा प्रथमाबहुवचने, ***क्विब्वृत्तेरसुधियस्तौ*** [**सिद्धहेम.२।१।५८**] इति यत्वे, अनेनापि प्रकारेणा**ग्निभ्य** इति रूपम् असिधत् ।

[२.२.१]तथा **पार्थिवेभ्य** इति, पृथिव्या विकारः, ***विकारे*** [**सिद्धहेम.६।२।३०**] इत्यण्, ***वृद्धिः स्वरेष्वादेः***[4] [**सिद्धहेम.७।४।१**] इत्यादिनादि[5]स्वरस्य वृद्धिः, ***अवर्णेवर्णस्य*** [**सिद्धहेम.७।४।६८**] इतीकारलोपे, ततः पार्थिवस्य इभ्य इति ***षष्ठ्ययत्नाच्छेषे*** [**सिद्धहेम**.**३।१।७६**] इति षष्ठीतत्पुरुषे, प्रथमाया एकवचने, [6]सस्य रुत्वे, विसर्गत्वे, ***अवर्णस्येवर्णादिना***[7] [**सिद्धहेम**.**१।२।६**] एत्वे च सिद्धं **पार्थिवेभ्य** इति ।

1 सस्य अ.२ ।

2 बिभ्यति सु.१ ।

3 अग्निशब्देन डस्युक्तं कृता पा.२, पा.१, अ.१ ।

4 वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते ।

5 स्वरवृद्धिः अ.२, सु.१ ।

6 तस्य अ.३, पा.१, अ.१, अ.२ ।

7 अवर्णस्येवर्णादिनैदोदरल् ।

[२.२.२]यद्वा पृथिव्या ईशः पार्थिवः, ***पृथिवीसर्वभूमेः***[1] [**सिद्धहेम**.६।४।१५६] इत्यादिनाञि[2] शेषं पूर्ववत् ।

[२.३]तथा **एषे**ति, ***जेषृङ् णेषृङ् एषृङ् ह्रेषृङ् गतौ*** [**सिद्ध.धातु.८३६-८३९**] इत्यस्य एषणं [3]एट् ***क्रुत् सम्पदादिभ्यः***[4] [**सिद्धहेम.५।३।११४**] इति क्विपि, तस्य लोपे, तृतीयैकवचने **एषे**ति [5]समसैत्सीत् ।

[२.४]**श्वानस्य** इति च साधुता, नासिकायै हितम्, ***प्राण्यङ्गरथखलतिलयववृषब्रह्ममाषाद्यः*** [**सिद्धहेम.७।१।३७**] इति ये, तत्र भवं वा, ***दिगादिदेहांशाद्यः*** [**सिद्धहेम.६।३।१२४**] इति ये, ***नस् नासिकायास्तः क्षुद्रे*** [**सिद्धहेम.३।२।९९**] इत्यधिकारे ***येऽवर्णे*** [**सिद्धहेम.३।२।१००**] इति नासिकाशब्दस्य नसादेशे, न नस्यं विद्यतेऽस्येत्यनस्यः, श्वेव श्वा, श्वा चासावनस्यः च, ***उपमानं सामान्यवचनैः***[6] [**सिद्धहेम.३।१।१०१**] इति समासे, तत आमन्त्र्ये सौ, ***अदेतः स्यमोर्लुक्*** [**सिद्धहेम.१।४।४४**] इ[ति] च तस्य लोपे च **श्वानस्य** इति सिद्धम् ॥२॥

**जिन०** [2.1.1] *"भ्यसि भये"* [**सिद्ध.धातु.** 852]

---

1 पृथिवीसर्वभूमेरीशज्ञातयोश्चाञ् ।

2 अणि अ.२ ।

3 एष सु.१ विना सर्वप्रतेषु ।

4 क्रुत्सम्पदादिभ्यः क्विप् ।

5 समासैत्सीत् पा.१, अ.३ ।

6 उपमानं सामान्यैः इति सिद्धहेमशब्दानुशासने । उपमानं सामान्यवचनैः (अष्टाध्यायी. 2|1|55) इति तु पाणिनीयं सूत्रम् ।

भ्यसते इति क्विपि, तल्लोपे, *"पञ्चमी भयाद्यैः"* [सिद्धहेम. 3।1।73] इति अग्रेर्भ्यः **अग्निभ्यः** इति प्रथमा-सौ रुपम् । [2.1.2] अथवा "ञिभींक् भये" [सिद्ध.धातु. 1132] अग्नि(ग्रे)र्बिभ्यतीति विग्रहे क्विपि, प्रथमा-जसि, *"क्विबब्वृत्तेरसुधियस्तौ"* [सिद्धहेम. 2।1।58] इति यत्वे, **अग्निभ्यः** इति सिद्धम् । [2.2] **पार्थिवेभ्यः** इति पार्थिवस्य इभ्यः । [2.3] *"जेषृङ् णेषृङ् एषृङ् ह्रेषृङ् गतौ"* [सिद्ध. धातु. 836-839] एषणं एषः, *क्रुत् संपदादिभ्यः* [सिद्धहेम. 5।3।114] इति क्विपि, टावचनेन रूपम् । [2.4.1] **श्वानस्येति** नस्य इति तद्धितयेन नासिका शब्दस्य रुपम् । न नस्यं विद्यतेऽस्येति अनस्यः, श्वेव अनस्यः श्वानस्यः, आमन्त्र्ये सौ **श्वानस्य** इति सिद्धम् । [2.4.2] शुनः आनः = प्राणः श्वानस्तस्य **श्वानस्य** इति भवति ।।2।।

**भवेतामिति शब्दोऽयं बहुत्वे वर्तते कथम् ?**
**यागः षष्ठीसमासः स्यात्पञ्चमी पर्वतान्न तु ॥३॥**

**गुण०** [३.१]**भवेताम्** इति ***भू सत्तायाम्*** [**सिद्ध.धातु.१**] सप्तमी-यातामप्रत्ययः, ***कर्तर्यनद्भ्यः शव्*** [**सिद्धहेम.३।४।७१**] इति शव् प्रत्ययः, ***नामिनो गुणोऽक्ङिति*** [**सिद्धहेम.४।३।१**] इति गुणः, ***ओदौतोऽवाव्*** [**सिद्धहेम.१।२।२४**] इत्यवादेशः, ***यः सप्तम्याः*** [**सिद्धहेम.४।२।१२२**] इति याशब्दस्येकारः, ***अवर्णस्येवर्णादिना***[1] [**सिद्धहेम.१।२।६**] इत्यनेनाकारस्येकारेण

1 अवर्णस्येवर्णादिनैदोदरल् ।

सह एकारः, इत्थं द्विवचनान्तम्, बहुवचनान्ते तु सन्देहः, तत्रोच्यते, भवः = संसारः, ***इंण्क् गतौ* [सिद्ध.धातु.१०७५]** इत्यस्य यन्तीति ***क्विप्*** **[सिद्धहेम.५।१।१४८]** इति क्विपि, तस्य लोपे, ***ह्रस्वस्य तः पित्कृति*** **[सिद्धहेम.४।४।११३]** इति तागमे, भवस्य इतो भवेत इति षष्ठीतत्पुरुषे कृते तेषां भवेतां षष्ठीबहुवचने सिद्धं **भवेताम्** इति ।

[३.२.१] **यागः** षष्ठीसमासः स्याद् इति अत्रापि कथम् इति योज्यम्। अः = विष्णुः [1]तस्यापत्यम् इः = कामः, ***अत इञ्*** **[सिद्धहेम.६।१।३१]** इतीञि। ***वृद्धिः स्वरेषु***[2] **[सिद्धहेम.७।४।१]** इत्यादिनाकारस्य वृद्धौ, ***अवर्णेवर्णस्य*** **[सिद्धहेम.७।४।६८]** इति प्रकृत्याकारलोपे प्रत्ययमात्रं प्रकृतिः, ततः षष्ठ्येकवचनम्, तस्य आगः शब्देन[3] ऐ आग इति विग्रहे, ***इवर्णादेरस्वे स्वरे यवरलम्*** **[सिद्धहेम.१।२।२१]** इतीकारस्य यत्वे, ***अधातुविभक्ति***[4] **[सिद्धहेम.१।१।२७]** इत्यादिना नामत्वे, प्रथमैकवचनत्वे, ***अनतो लुप्*** **[सिद्धहेम.१।४।५९]** इति तस्य लोपे, सकारस्य रुत्वे, विसर्गादेशे च सति **याग** इति पदं सिद्धम् ।

[३.२.२]यद्वा ईः = लक्ष्मीः, तस्या आगः = अपराधो **याग** इति द्वैतीयीकेन प्रकारेण निरवर्तत ।

[३.२.३]यद्वा या = लक्ष्मीः, याया अगः = पर्वतः पादपो

---

1 अस्य अ.२ विना सर्वप्रतेषु ।

2 वृद्धिः स्वरेष्वादेञ्णिति तद्धिते ।

3 शब्देन.. नामत्वे इति यावत् अ.२ विना नास्ति ।

4 अधातुविभक्तिवाक्यमर्थवन्नाम ।

वा । इत्थं तार्तीयीकेनापि प्रकारेण निष्पेदे । शेषं पूर्ववत् ।

[३.३.१]पञ्चमी **पर्वतान्न** त्विति, पञ्चम्यन्ते तु तावत् सुगमः, अपञ्चम्यन्ते तु सन्देहः । तत्र क्रमः, ***पूर्व पर्व मर्व पूरणे*** [**सिद्ध.धातु.४५४-४५६**], पर्व इत्ययं धातुर्भ्वादौ परस्मैपदी, तस्मात् पञ्चम्याः परस्मैपदप्रथमत्रिकस्यैकवचनं तुव्, ***कर्तर्यनद्भ्यः शव्*** [**सिद्धहेम.३।४।७१**] इति शव् प्रत्ययः, ***आशिषि तुह्योस्तातङ्*** [**सिद्धहेम.४।२।११९**] इति तातङादेशः, सिद्धं **पर्वताद्** इति ।

[३.३.२] अथवा ***अदं प्सांक् भक्षणे*** [**सिद्ध.धातु.१०५९-१०६०**] इत्यस्य पर्वतशब्दस्य प्राग् निक्षेपः, पर्वतम् अत्तीति वाक्ये, ***अदोऽनन्नात्*** [**सिद्धहेम.५।१।१५०**] इति क्विपि, तस्य लोपे, ***अधातुविभक्ति***[1] [**सिद्धहेम.१।१।२७**] इत्यादिना नामत्वे, ***नाम्नः प्रथमैकद्विबहौ*** [**सिद्धहेम.२।२।३१**] इति प्रथमाया एकवचने, ***दीर्घङ्याब्***[2] [**सिद्धहेम.१।४।४५**] इत्यादिना तस्य लोपे ***विरामे वा*** [**सिद्धहेम.१।३।५१**] इति दस्य तेऽनेनापि प्रकारेण सिद्धं **पर्वताद्** इति । अमुना प्रकारेण [3.4] **वृक्षाद्,** [3.5] **घटाद्** इत्यादयोऽप्यूह्याः ॥३॥

**जिन०** [3.1] भवं संसारं यन्तीति भवेतस्तेषां **भवेताम्** । [3.2.1] **यागः षष्ठीसमास इत्यत्रापि कथमिति योज्यम्** । इः = कामस्तस्याऽऽगो=ऽपराधो **यागः** । [3.2.2] याया अगः

1 अधातुविभक्तिवाक्यमर्थवन्नाम ।

2 दीर्घङ्याब् व्यञ्जनात् सेः ।

= पर्वतो वृक्षो वा **यागः** इत्यपि । [3.3.1] **पर्वतादिति** पर्वधातोः पञ्चमी-तुवि, तस्य तातङ्आदेशे सिद्धम् । [3.3.2] पर्वतमत्ति **पर्वतात्** *"अदोऽनन्नात्* [सिद्धहेम. 5।1।150] इति क्विपि वा रूपम् ।।3।।

**पञ्चद्धलानि साधुत्वं कथं याति च लक्षणात् ।**
**मुनीनामिति नो षष्ठी त्याद्यन्तं चाश्व इत्यपि ॥४॥**

**गुण०** [४.१]**पञ्चड्ढलानी**ति, पञ्चन् षष् व्यवस्थापिते[1] पञ्च वा षड् वा इति विग्रहे, ***प्रमाणीसङ्ख्याड्डः*** [**सिद्धहेम.७।३।१२८**] इति डे समासान्ते, ***डित्यन्त्यस्वरादेः*** [**सिद्धहेम.२।१।११४**] इत्यन्त्यस्वरादिलोपे, पञ्चषान् आचष्टे इति वाक्ये, ***णिज्बहुलं नाम्नः कृगादिषु*** [**सिद्धहेम.३।४।४२**] इति णिज्प्रत्यये, ***त्रन्त्यस्वरादेः*** [**सिद्धहेम.७।४।४३**] इत्यन्त्यस्वरादिलोपे, ***क्रियार्थो धातुः*** [**सिद्धहेम.३।३।३**] इति धातुत्वे, [2]पञ्चषयतीति ***क्विप्*** [**सिद्धहेम.५।१।१४८**] इति क्विपि, ***अप्रयोगीत्*** [**सिद्धहेम.१।१।३७**] इति तस्य लोपे, ***णेरनिटि*** [**सिद्धहेम.४।३।८३**] इति णिलोपे, पञ्चषां हलानीति षष्ठीसमासे, ***धुटस्तृतीयः*** [**सिद्धहेम.२।१।७६**] इति षकारस्य डकारे, ***ततो हश्चतुर्थः*** [**सिद्धहेम.१।३।३**] इति हस्य ढत्वे **पञ्चड्ढलानी**ति सिद्धिम् अध्यास्ते ।

---

1 व्यवस्थाप्यते पा.१ ।

2 पञ्चष.. णिलोपे इति यावत् अ.१, अ.२ विना नास्ति ।

[४.२]**मुनीनाम्** इति, मुनिः इनो यस्याः [1]सा मुनीना, द्वितीयैकवचने ***समानादमोऽतः*** [**सिद्धहेम.१।४।४६**] इत्यकारलोपे च मुनीनाम् इति पदं सिद्धिम् अगात् ।

[४.३]त्याद्यन्तं **चाश्व** इत्यपीति, ***ट्वोश्वि गतिवृद्ध्योः*** [**सिद्ध. धातु.९९७**] अद्यतनी- सिः, ***ऋदिच्छ्व***[2] [**सिद्धहेम.३।४।६५**] इत्यादिनाङि, ***अड् धातोः***[3] [**सिद्धहेम.४।४।२९**] इत्यादिनाडागमे, ***श्वयत्यसू***[4] [**सिद्धहेम.४।३।१०३**] इत्यादिना श्वादेशे, ***सो रुः*** [**सिद्धहेम.२।१।७२**] इति सस्य रुत्वे, ***रः पदान्ते***[5] [**सिद्धहेम.१।३।५३**] इत्यादिना विसर्गादेशे च **सत्यश्व** इति रूपं सिद्धिम् ऐयः ॥४॥

**जिन०** [4.1] पञ्च वा षड् वा पञ्चषाः । पञ्चषान् आचष्टे इति णिचि, पञ्चषयन्तीति क्विपि, पञ्चषां हलानि, **पञ्चङ्कलानि** इति सिद्धम् । [4.2] **मुनीनामि**ति मुनिरिनो यस्याः सा मुनीना तां **मुनीनाम्** । [4.3] **अश्व** इति श्वयतोरद्यतनी-सौ, अङि रूपम् ।।4।।

**अष्टाविति कथं द्वित्वं राजेभ्य इति साधुता ।**
**तेनेत्येतत्त्याद्यन्तं स्यादत्याद्यन्तं भवेदिति ॥५॥**

---

1 सा तथा तां पश्येति मुनिनामिति पदं अ.१ ।

2 ऋदिच्छ्वस्तम्भूम्रुचूम्लुचुग्रुचूग्लुचूग्लुञ्चूज्रो वा ।

3 अड् धातोरादिर्ह्यस्तन्यां चामाङा ।

4 श्वयत्यसूवचपतः श्वास्थवोचपप्तम् ।

5 रः पदान्ते विसर्गस्तयोः ।

**गुण०** [५.१]**अष्टौ** इति, अष्टनो जसि शसि वा सुबोधम्[1], द्विवचनान्ते तु सन्देहः। तत्रोच्यते, ***अशौटि व्याप्तौ*** [**सिद्ध. धातु.१३१४**] इत्यस्याश्यते इति वाक्ये, ***ज्ञानेच्छार्चार्था*** [**सिद्धहेम.५।२।९२**] इत्यादिना क्ते, ***यजसृज***[2] [**सिद्धहेम.२।१।८७**] इत्यादिना शस्य षत्वे, ***तवर्गस्य श्चवर्ग***[3] [**सिद्धहेम.१।३।६०**] इत्यादिना तस्य टत्वे, प्रथमाद्वितीयाद्विवचने, ***ऐदौत् सन्ध्यक्षरैः*** [**सिद्धहेम.१।२।१२**] इत्यकारस्यौकारेण सह औकारे च **अष्टौ** इति रूपं सिद्धिम् [4]आयात् ।

[५.२]**राजेभ्य** इति साधुता, राजन्शब्दाद् भ्यसि, ***नामसिदय्व्यञ्जने*** [**सिद्धहेम.१।१।२१**] इति पदत्वे, ***नाम्नो नोऽनह्नः*** [**सिद्धहेम.२।१।९१**] इति नकारलोपे, स्यादिविधौ विधातव्ये नकारस्य सत्वे, ***एद्बहुस्भोसि*** [**सिद्धहेम.१।४।४**] इत्यनेन एत्वं न भवति, अकारान्तत्वाभावात् । एत्वाभावे राजभ्य इत्येव भवति, इदं तु कथम् ? इत्यत्रोच्यते, राज्ञाम् इभ्यो राजेभ्य इति विगृह्य प्रथमाया एकवचने **राजेभ्य** इति सिद्धिम् आयासीत् ।

[५.३]**तेने**त्येतत्त्याद्यन्तं स्याद् इति, ततः(दः) तृतीयैकवचने सुगमम् एव, त्याद्यन्तं तु ***तनूयी विस्तारे*** [**सिद्ध.धातु.१४९९**]

1 सुगमं पा. १ ।

2 यजसृजमृजराजभ्राजभ्रस्जव्रस्चपरिव्राजः शः षः ।

3 तवर्गस्य श्चवर्गष्टवर्गाभ्यां योगे चटवर्गौ ।

4 मगात् अ.२ ।

इत्यस्य परोक्षा-अप्रत्ययः, ***अनादेशादेरेक***[1] [**सिद्धहेम.४।१।२४**] इत्यादिनोपान्त्यस्याकारस्य एत्वे, द्वित्वाभावे च **तेने**ति निरापाद्यते।

[५.४]वृक्षशब्दः सप्तम्येकवचनान्तोऽग्रे ***अण रण*** [**२५९-२६०**] इत्यादिदण्डकधातुः, पञ्चम्या हौ, शवि, ***अतः प्रत्ययाल्लुक्*** [**सिद्धहेम.४।२।८५**] इति हेर्लुकि, ***एदोतः पदान्तेऽस्य लुक्*** [**सिद्धहेम.१।२।२७**] इति अणाकारस्य लोपे [2]**वृक्षेण** इति सिद्धम्।

इत्यनया दिशान्यदप्यूह्यम्। अन्यदप्येवं[3]जातीयं प्रस्तावाद् ब्रूमः।

[५.५][4]अस्मदः षष्ठ्येकवचने ***तव मम ङसा*** [**सिद्धहेम.२।१।१५**] इति ङसा सह सुगमम् एव, त्याद्यन्तं तु कथम्? तद्दर्शयामः, ***मांक् माने*** [**सिद्ध.धातु.१०७३**] परोक्षा-अप्रत्यये, ***द्विर्धातुः परोक्षा***[5] [**सिद्धहेम.४।१।१**] इत्यादिना द्विर्वचने, ***ह्रस्वः*** [**सिद्धहेम.४।१।३९**] इति पूर्वस्य ह्रस्वत्वे, मूलधातोः ***इडेत्पुसि चातो लुक्*** [**सिद्धहेम.४।३।९४**] इत्याकारस्य लोपे **ममे**ति निर्वृते।

[6]तथैतान्येकवचनान्तान्येव—

---

1 अनादेशादेरेकव्यञ्जनमध्येऽतः।

2 सिद्धं वृक्षेण अ.२ विना सर्वप्रतेषु।

3 एवं जानीयाद् प्रस्ता अ.२।

4 अस्मद् पा.१, अ.१।

5 द्विर्धातुः परोक्षा-ङे प्राक् तु स्वरे स्वरविधेः।

6 नास्ति पा.२, सु.१ मध्ये।

*यूथानि गूथानि घृतानि रात्रीः क्षीराणि वृत्तानि दिवान्यजागाः ।*
*सुखानि [1]शूराणि तृणान्यदानि स्थूलानि सूत्राणि [2]मूढान्यराराः ॥१॥*

[५.६.१]**यूथानी**ति, ***अन श्वसक् प्राणने*** [**सिद्ध.धातु.१०८९-१०९०**] इत्यस्य [3]यूथशब्दस्य प्राग् निक्षेपः, यूथम् अनितीत्येवं शीलं यत् कुलम् इति वाक्ये, ***अजातेः शीले*** [**सिद्धहेम.५।१।१५४**] इति णिन्प्रत्यये, ***ञ्णिति*** [**सिद्धहेम.४।३।५०**] इत्यनेनोपान्त्याकारस्य वृद्धौ, प्रथमाया एकवचने, ***अनतो लुप्*** [**सिद्धहेम.१।४।५९**] इति तस्य लुपि, ***नाम्नो नोऽनह्नः*** [**सिद्धहेम.२।१।९१**] इति नकारलोपे, ***समानानां तेन दीर्घः*** [**सिद्धहेम.१।२।१**] इति पूर्वस्याकारस्याकारेण सह दीर्घत्वे च [4]सिद्धं **यूथानी**ति ।

[५.६.२][5]*अथवा यूथम् आनयतीति क्विपि तस्य लोपे, ***क्लीबे*** [**सिद्धहेम.२।४।९७**] इति तस्य ह्रस्वत्वे, ततः सौ, ***अनतो लुप्*** [**सिद्धहेम.१।४।५९**] इति तस्य लोपे सिद्धं यूथानीति ।* एवं [५.७]**गूथानि** [५.८]**घृतानी**ति ।

[५.९]**रात्रीरि**ति, रात्रिम् इच्छतीति वाक्ये ***अमाव्ययात् क्यन् च*** [**सिद्धहेम.३।४।२३**] इति क्यन्प्रत्यये, ***दीर्घश्च्वियङ्***[6]

---

1 सूराणि अ.१, अ.३, पा.२ मध्ये ।

2 गूढान्य अ.३, दृढानि अ.१, पा.१ ।

3 यूथशब्दस्य प्राणने इत्यस्य उत्क्षेपं अ.२ ।

4 अ.२ विना नास्ति ।

5 *......* एतच्चिह्नान्तर्गतः पाठः सु.१ विना नास्ति ।

6 दीर्घश्च्वियङ्यक् क्येषु च ।

[**सिद्धहेम.४।३।१०८**] इत्यादिना इकारस्य दीर्घत्वे, रात्रीयतीति क्विपि, ***अतः*** [**सिद्धहेम.४।३।८२**] इत्यकारलोपे, ***य्वोः प्वय्व्यञ्जने लुक्*** [**सिद्धहेम.४।४।१२१**] इति यकारलोपे, प्रथमाया एकवचने सिद्धं **रात्रीरि**ति ।

[५.१०]**क्षीराणी**ति, ***अण रण*** [**सिद्ध.धातु.२५९-२६०**] इत्यादिदण्डकधातुः क्षीरपूर्वकः । क्षीरम् अणतीत्येवं शीलं यत् कुलम् इति वाक्ये शेषं यूथानिवत् । तथा [५.११]**वृत्तानि**, [५.१२] **दिवानि**, [५.१३]**सुखानि**, [५.१४]**शूराणि**, [५.१५]**तृणानि**, [५.१६][**स्थूलानि**], [५.१७]**सूत्राणि**, [५.१८] [1]**मूढानि** इत्येतानि सिद्धिम् अगुः ।

[५.१९]**अदानि** तु अत्तेः पञ्चम्या आनिवि सिद्ध्यति ।

[५.२०]**अजागाः**, [इति] ***कैं गैं रैं शब्दे*** [**सिद्ध.धातु.३६-३८**], ***गाङ् गतौ*** [**सिद्ध.धातु.५८६**] इत्यस्य वा अत्यर्थं गायति [2]गाते वा इति ***व्यञ्जनादेरेकस्वराद्***[3] [**सिद्धहेम.३।४।९**] इत्यादिना यङि, तल्लुपि, ***सन्यङश्च*** [**सिद्धहेम.४।१।३**] इत्यादिना द्विर्वचने, ***ह्रस्वः*** [**सिद्धहेम.४।१।३९**] इति पूर्वस्य ह्रस्वत्वे, ***गहोर्जः*** [**सिद्धहेम.४।१।४०**] इति जत्वे, ***आगुणावन्यादेः***

---

1 दृढानि पा. १, अ.१, अ.२ ।

2 गायते पा. २, अ. २ ।

3 व्यञ्जनादेरेकस्वराद् भृशाभीक्ष्ण्ये यङ्वा ।

[**सिद्धहेम.४।१।४८**] इत्यस्याकारे, ह्यस्तन्याः सिवि, ***अड् धातोः***[1] [**सिद्धहेम.४।४।२९**] इत्यादिनाडागमे, ***सो रुः*** [**सिद्धहेम.२।१।७२**] इत्यनेन सकारस्य रुत्वे, ***रः पदान्ते***[2] [**सिद्धहेम.१।३।५३**] इत्यादिना विसर्गादेशे च **सत्यजागा** इति [3]सिद्धिम् अधात् ।

[५.२१]**अराराः** इति, ***रांक् दाने*** [**सिद्ध.धातु.१०६९**] इत्यस्य, शेषं पूर्ववत् ।

[५.२२]अत्याद्यन्तं **भवेद्** इति, भवः = संसारः तम् एति, ***इंण्क् गतौ*** [**सिद्ध.धातु.१०७५**] इत्यस्य क्विपि, ***ह्रस्वस्य तः पित्कृति*** [**सिद्धहेम.४।४।११३**] इति तागमे, ***अप्रयोगीद्*** [**सिद्धहेम.१।१।३७**] इति तस्य लुपि, प्रथमैकवचने, ***दीर्घङ्याब्***[4] [**सिद्धहेम.१।४।४५**] इत्यादिना तस्य लोपे, ***अवर्णस्य***[5] [**सिद्धहेम.१।२।६**] इत्यादिनाकारस्येता सह एत्वे सिद्धं **भवेद्** इति ॥५॥

**जिन०** [5.1] अश्नोतेः क्ते अष्ट इति सिद्धे औवचने **अष्टौ** इति रुपम् । [5.2] **राजेभ्य** इति राज्ञामिभ्यो **राजेभ्यः** । [5.3] **तेने**ति तनोतेः परोक्षा-अप्रत्यये सिद्धम् । [5.4] **भवेदि**ति भवमेतीति क्विपि, प्रथमा-सौ सिद्धम् ।।5।।

1 अड् धातोरादिर्ह्यस्तन्यां चामाङा ।

2 रः पदान्ते विसर्गस्तयोः ।

3 मगात् अ.२ ।

4 दीर्घङ्याब्व्यञ्जनात् सेः ।

5 अवर्णस्येवर्णादिनैदोदरल् ।

**हस्तौ द्विवचनं नेदं शोभनेष्वित्यसप्तमी ।**
**क्षीरस्येति न षष्ठीयं त्याद्यन्तं वायुरित्यपि ॥६॥**

**गुण०** [६.१]***हसे हसने*** [**सिद्ध.धातु.५४५**] इत्यस्य हस्याद् इति वाक्ये, ***तिक्कृतौ नाम्नि*** [**सिद्धहेम.५।१।७१**] इति तिक् प्रत्यये सप्तम्येकवचने ङि "***ङिड्डौं***" [**सिद्धहेम.१।४।२५**] इति ङेर्डावादेशे, ***डित्यन्त्यस्वरादेः*** [**सिद्धहेम.२।१।११४**] इत्यन्त्यस्वरादिलोपे च सिद्धं **हस्तौ** इति ।

[६.२]**शोभनेष्वि**त्यसप्तमी, शोभना इषवो यस्य धनुषः तच्छोभनेषु[1] *सुशरम्[2] इत्यर्थः, ततः प्रथमैकवचने, ***अनतो लुप्*** [**सिद्धहेम.१।४।५९**] इति तस्य लोपे सिद्धं **शोभनेषु*** इति ।

[६.३]**क्षीरस्ये**ति न षष्ठीयम् इति, क्षीरम् इच्छतीति वाक्ये ***अमाव्ययात् क्यन्***[3] [**सिद्धहेम.३।४।२३**] इति [4]क्यन्प्रत्यये, ***अस् च लौल्ये*** [**सिद्धहेम.४।३।११५**] इति क्यन्प्रत्ययस्य [5]प्राक् सकारागमे, ***क्रियार्थो धातुः*** [**सिद्धहेम.३।३।३**] इति धातुत्वे, पञ्चम्या हौ, शवि, ***लुगस्यादेत्यपदे*** [**सिद्धहेम.२।१।११३**] इति पूर्वस्याकारस्य लोपे, ***अतः प्रत्ययाल्लुग्*** [**सिद्धहेम.४।२।८५**] इति हेर्लोपे च

---

1 *.....* एतच्चिह्नान्तर्गतः पाठः पा. २ मध्ये नास्ति ।

2 सरमि पा. २ सशरमि अ. ३, पा. १, अ.१, सु.१ ।

3 अमाव्ययात् क्यन् च ।

4 क्यनि अ.२ विना सर्वप्रतेषु ।

5 प्राक् सु.१ विना नास्ति ।

**क्षीरस्य** इति रूपं प्रतिष्ठाम् आप ।[1]

[६.४]त्याद्यन्तं **वायुरि**त्यपि इति, ***वांक् गतिगन्धनयोः*** [**सिद्ध.धातु.१०६३**] इत्यस्य सप्तम्या [2]युस् प्रत्यये, ***सो रुः*** [**सिद्धहेम.२।१।७२**] इति सकारस्य रुत्वे, ***रः पदान्ते***[3] [**सिद्धहेम.१।३।५३**] इत्यादिना विसर्गादेशे च सति सिद्धं **वायुरि**ति ॥६॥

**जिन०** [6.1] *"हसे हसने"* [सिद्ध.धातु. 545] हस्याद् इति वाक्ये, *"तिक्कृतौ नाम्नि"* [सिद्धहेम. 5।1।71] इति तिकि, सप्तमी-ङौ, **हस्तौ** इति सिद्धम् । [6.2] **शोभनेष्वि**ति शोभना इषवो यत्र धनुंषि **तच्छोभनेषु** । [6.3] **क्षीरस्ये**ति क्षीरमिच्छतीति *"अमाव्ययात् क्यन् च"* [सिद्धहेम. 3।4।23] इति वा क्यनि, *"अस् च लौल्ये"* [सिद्धहेम. 4।3।115] इति सागमे, *"क्रियार्थो धातुः"* [सिद्धहेम. 3।3।3] इति धातुत्वे, पञ्चमी-हौ रुपम् । [6.4] **वायुरि**ति वातेर्युसि सिद्धम् ।।6।।

**दधिस्येति कथं साधु मधुस्येति तथा परम् ।**
**केनेत्येतदटान्तं स्यादपापा इत्यसुस्तथा[4] ॥७॥**

**गुण०** [७.१]दधीच्छतीति [७.२]मध्विच्छतीति [5]*वाक्ये

1 अवाप अ.२ ।

2 युसि अ.२ विना सर्वप्रतेषु ।

3 रः पदान्ते विसर्गस्तयोः ।

4 तया अ.१, तता अ.३, पा.२, अ.२ सु. १ ।

5 *.....* एतच्चिह्नान्तर्गतः पाठः अ.२ मध्ये नास्ति ।

शेषं क्षीरस्येतिवत्, ***अस् च लौल्ये*** [**सिद्धहेम.४।३।११५**] इति च प्रत्ययद्वन्द्वं विधीयते, यदा [1]अस् तदा ***इवर्णादेः***[2] [**सिद्धहेम.१।२।२१**] इत्यादिना यत्वे वत्वे च **दध्यस्य**, **मध्वस्य** इति सिद्धम् ।* अत्रापि शेषं पूर्ववत् ।

[७.३] [७.४]अथवा ***षोंच् अन्तकर्मणि*** [**सिद्ध. धातु.११५०**] इत्यस्य दधिशब्दस्य प्राग् रूपे, पञ्चम्या हौ, ***दिवादेः श्यः*** [**सिद्धहेम.३।४।७२**] इति श्यप्रत्यये, ***ओतः श्ये*** [**सिद्धहेम.४।२।१०३**] इत्योकारस्य लोपे, ***अतः प्रत्ययाल्लुक्*** [**सिद्धहेम.४।२।८५**] इति हेर्लोपे च सिद्धं दधिस्य, मधुस्य इति → [3]यथापरम् । इति[4] पूर्ववत् सिद्धम् ←।

[७.५] **केने**त्येतदटान्तं स्याद् इति, कं = वारि तस्येनः केनः, आमन्त्र्ये सौ, ***अदेतः स्यमोर्लुक्*** [**सिद्धहेम.१।४।४४**] इति तस्य लोपे च सिद्धं **केन** इति ।

[७.६] **अपापा** [5]इत्यसुप्तथा इति, न विद्यते पापं येषां तेऽपापा इति सुगमम् एव, प्रकारान्तरेणोच्यते, ***पर्दि कुत्सिते शब्दे*** [**सिद्ध. धातु.७३९**] इत्यस्यात्यर्थं पर्दत इति ***व्यञ्जनादेः***[6] [**सिद्धहेम.३।४।९**]

---

1 अस्च् इति पा.१ विना सर्वप्रतेषु ।

2 इवर्णादेरस्वे स्वरे यवरलम् ।

3 →.....← एतच्चिह्नान्तर्गतः पाठः सु.१ मध्ये नास्ति ।

4 मपि पा.२ विना सर्वप्रतेषु ।

5 तया अ.१, तता अ.३, पा.२, अ.२ सु. १ ।

6 व्यञ्जनादेरेकस्वराद् भृशाभीक्ष्ण्ये यङ्वा ।

इत्यादिना यङि, ***सन्यङश्च*** [**सिद्धहेम.४।१।३**] इति द्वित्वे, ***व्यञ्जनस्यानादेर्लुक्*** [**सिद्धहेम.४।१।४४**] इत्यन्त्यव्यञ्जनलोपे, ***आगुणावन्यादेः*** [**सिद्धहेम.४।१।४८**] इत्याकारे, ह्यस्तन्याः सिवि, ***अड् धातोः***[1] [**सिद्धहेम.४।४।२९**] इत्यादिनाडागमे, [2]***बहुलं लुप्*** [**सिद्धहेम.३।४।१४**] इति यङ्लोपे, ***सेः स्द्धां च रुर्वा*** [**सिद्धहेम.४।३।७९**] इति सिवो लुकि, दस्य रुत्वे च, ***रो रे लुग् दीर्घश्चादिदुतः*** [**सिद्धहेम.१।३।४१**] इत्यादिना रेफस्य लोपे, पूर्वस्वरस्य दीर्घत्वे च, रेफस्य विसर्गादेशे च **सत्यपापा** इति [3]सिद्धिम् आयात् ।

एवं गृधेः स्पर्धेर्नर्देः च यङ्लुपि, द्वित्वे, ***रिरौ च लुपि*** [**सिद्धहेम.४।१।५६**] इति पूर्वस्य रागमे, ***आगुणावन्यादेः*** [**सिद्धहेम.४।१।४८**] इति दीर्घत्वे च, ह्यस्तन्याः सिवि, ***गडदबादेः***[4] [**सिद्धहेम.२।१।७७**] इत्यादिना आदेश्चतुर्थत्वे, ***लघोरुपान्त्यस्य*** [**सिद्धहेम.४।३।४**] इति गुणे, ***सेः स्द्धां च रुर्वा*** [**सिद्धहेम.४।३।७९**] इति सिवो लुकि, धकारस्य रुत्वे शेषं पूर्ववत्। [७.७]**अजर्घाः**, [७.८] **अपास्पाः**, [७.९]**अनाना** इति रूपाणि सिद्धिम् आस्कांसुः[5] । एवम् अन्यान्यपि रूपाण्यूहनीयानि ॥७॥

---

1 अड् धातोरादिर्ह्यस्तन्यां चामाङा ।

2 बहुलं.. लोपे इति पा.२ विना नास्ति ।

3 प्रसिद्धिमयात् अ.१, सिद्धिमयात् अ.२ ।

4 गडदबादेश्चतुर्थान्तस्यैकस्वरस्यादेश्चतुर्थः स्ध्वोश्च प्रत्यये ।

5 मस्कंसुः अ.१, पा.२ ।

**जिन०** [7.1.1] [7.2.1] **दधिस्य-मधुस्य**शब्दौ क्षीरवत् । [7.1.2] [7.2.2] यदिवा दधीति पृथक् स्य इति षोंच् धातोर्ह्रौ रुपम् । [7.3] **केने**ति कं = वारि तस्येनः केनस्तस्यामन्त्रणे **केन** इति सिद्धम् । [7.4] **अपापा** इति पर्दते, यङि, द्वित्वे, पूर्वस्य आत्वे, यङ्[लुपि], सिवि, अडागमे, *"सेः स्द्धां च रुर्वा"* [सिद्धहेम. 4।3।79] इति सिवो लोपे, दस्य रूत्वे "रो रे लुग०" [सिद्धहेम. 1।3।41] इति रलोपे प्राग् दीर्घत्वे च सिद्धम् ।।7।।

**एतेषां [1]कथमेकत्वं वनानि ब्राह्मणैरमी ।**
**वृक्षाः पचन्ति येषां यान् वायुभ्यः पार्थिवाः सुराः ॥८॥**

**गुण०** [८.१]***वन षण सम्भक्तौ*** [**सिद्ध.धातु.३२९-३३०**] इत्यस्य पञ्चम्या आनिवि, शवि, ***समानानाम्***[2] [**सिद्धहेम.१।२।१**] इत्यादिना समानदीर्घत्वे **वनानि** इति सिद्धम् ।

[८.२]**ब्राह्मणै**रिति, ***इंण्क् गतौ*** [**सिद्ध.धातु.१०७५**] इत्यस्य ह्यस्तन्याः सिवि, ***स्वरादेस्तासु*** [**सिद्धहेम.४।४।३१**] इति वृद्धौ, ***सो रुः*** [**सिद्धहेम.२।१।७२**] इति सस्य रुत्वे, विसर्गादेशे च सति तत आमन्त्र्यार्थः ब्राह्मण ! [3]गतोऽसि इत्यर्थः ।

[८.३]**अमी** इति, ***अम द्रम हम मीमृ गम्लृं गतौ***

1 प्रथमैक पा.२ ।
2 समानानां तेन दीर्घः ।
3 तोऽयम् अ.२ ।

[**सिद्ध.धातु.३९२-३९६**] इत्यस्यामनम् अम इति वाक्ये, ***भावाकर्त्रोः*** [**सिद्धहेम.५।३।१८**] इति घञि, ***अमोऽकम्यमिचमः*** [**सिद्धहेम.४।२।२६**] इति वृद्धिप्रतिषेधे, अमोऽस्यास्तीति विग्रहे, ***अतोऽनेकस्वराद्*** [**सिद्धहेम.७।२।६**] इतीनि, ***नाम्नः***[1] [**सिद्धहेम.२।२।३१**] इत्यादिना प्रथमैकवचने, ***दीर्घङ्याब्***[2] [**सिद्धहेम.१।४।४५**] इत्यादिना तस्य लोपे, ***इन् हन्***[3] [**सिद्धहेम.१।४।८७**] इत्यादिनोपान्त्याकारस्य दीर्घत्वे, ***नाम्नो नोऽनह्नः*** [**सिद्धहेम.२।१।९१**] इति नकारस्य लोपे**ऽमी** इति सिद्धम्।

[८.४]**वृक्षा** इति, ***असूच् क्षेपणे*** [**सिद्ध.धातु.१२२१**] इत्यस्यास्यतीति [4]*वाक्ये, क्विपि, तस्य लोपे, ***अधातुविभक्ति***[5] [**सिद्धहेम.१।१।२७**] इत्यादिना नामत्वे, ***नाम्नः***[6] [**सिद्धहेम.२।१।३१**] इत्यादिना प्रथमैकत्वे, ***सो रुः*** [**सिद्धहेम.२।१।७२**] इति सकारस्य रुत्वे, विसर्गादेशे च ततो [7]वृक्षशब्दस्यामन्त्र्यार्थस्य तस्य अः, ***समानानाम्***[8] [**सिद्धहेम.१।२।१**] इति* दीर्घत्वे च **वृक्षा** इति सिद्धम्। → [9]छान्दसश्चायं प्रयोगः । ←

---

1 नाम्नः प्रथमैकद्विबहौ ।

2 दीर्घङ्याब्व्यञ्जनात् सेः ।

3 इन्हन्पूषार्यम्णः शिस्योः ।

4 *.....* एतच्चिह्नान्तर्गतः पाठः अ.१ मध्ये नास्ति ।

5 अधातुविभक्तिवाक्यमर्थवन्नाम ।

6 नाम्नः प्रथमैकद्विबहौ ।

7 वृक्षस्यामन्त्र्यार्थस्य समा पा.१, अ.२ ।

8 समानानां तेन दीर्घः ।

9 →.....← एतच्चिहनान्तर्गतः पाठः अ.१ मध्ये नास्ति ।

[८.५]**पचन्ति** इति, ***डुपचींष् पाके*** [**सिद्ध.धातु.८९२**] इत्यस्य पचतीति वाक्ये, ***शत्रानशावेष्यति तु सस्यौ*** [**सिद्धहेम.५।२।२०**] इति शतृप्रत्यये, शवि, ***लुगस्यादेत्यपदे*** [**सिद्धहेम.२।१।११३**] इत्यलोपे, ***अधातूदृदितः*** [**सिद्धहेम.२।४।२**] इति ङीप्रत्यये, ***श्यशवः*** [**सिद्धहेम.२।१।११६**] इति[1]० नागमे, आमन्त्र्ये सौ, ***नित्यदिद् द्विस्वराम्बार्थस्य ह्रस्वः*** [**सिद्धहेम.१।४।४३**] इति सिना सह ह्रस्वत्वे, **पचन्ति** इति सिद्धम् ।

[८.६]**येषाम्** इति, ***येषृङ् प्रयत्ने*** [**सिद्ध.धातु.८३५**] येष्यते इति० ***क्तेटो गुरोर्व्यञ्जनात्*** [**सिद्धहेम.५।३।१०६**] इत्यप्रत्ययः, ***आत्*** [**सिद्धहेम.२।४।१८**] [2]इत्यापि, दीर्घत्वे, द्वितीयैकवचनम् अम्, ***समानादमोऽतः*** [**सिद्धहेम.१।४।४६**] इत्यमोऽकारस्य लुक्, **येषाम्** इति सिद्धम् । षष्ठ्यन्तं तु सुगमम् एव ।

[८.७]**यान्** इति, ***यांक् प्रापणे*** [**सिद्ध.धातु.१०६२**] यातीति वाक्ये, शतृप्रत्ययः, प्रथमैकवचनं [3]सि, ***ऋदुदितः*** [**सिद्धहेम.१।४।७०**] इति नागमः, ***दीर्घङ्याब्***[4] [**सिद्धहेम.१।४।४५**] इत्यादिना तस्य लोपः, ***पदस्य*** [**सिद्धहेम.२।१।८९**] इति [5]तलोपः, [6]**यान्** इति सिद्धम् ।

---

1 ०.....०एतच्चिहनान्तर्गतः पाठः अ.१ मध्ये नास्ति ।

2 त्याप् पा.१, अ.१ विना सर्वप्रतेषु ।

3 सि पा.१ विना नास्ति ।

4 दीर्घङ्याब्व्यञ्जनात् सेः ।

5 तलोपे पा.१, तकारस्यापि लोपे सु.१ ।

6 समानदीर्घ इति अ.२ मध्येऽधिकम् ।

[८.८]**वायुभ्य**[1]* इति, यथा अग्निभ्यः ।

[८.९]**पार्थिवा** इति, ***असूक्षे पणे*** [**सिद्ध.धातु.१२२१**] इत्यस्य *पार्थिवम् अस्यतीति [2]क्विप्, तस्य लोपः [3]समानदीर्घः, प्रथमैकत्वम्, ***दीर्घ***[4] [**सिद्धहेम.१।४।४५**] इत्यादिना तस्य लोपः, ***सो रुः*** [**सिद्धहेम.२।१।७२**] इति सकारस्य रुत्वे, विसर्गादेशे च सति **पार्थिवा** इति [5]सिद्धम् ।

[८.१०]**सुरा** इति, ***षुंग्ट् अभिषवे*** [**सिद्ध.धातु.१२८६**] सुराशब्दस्य [6]प्रागवस्थानम्, ***षः सोऽष्ट्यैष्ठिवष्वष्कः*** [**सिद्धहेम.२।३।९८**] इति षस्य सः, सुरां सुनोतीति क्विप्, तस्य [7]लुक्, ***ह्रस्वस्य तः पित्कृति*** [**सिद्धहेम.४।४।११३**] इति तागमः, सुरासुतम् आचष्टे ***णिज्बहुलम्***[8] [**सिद्धहेम.३।४।४२**] इत्यादिना णिच्प्रत्ययः, ***त्रन्त्यस्वरादेः*** [**सिद्धहेम.७।४।४३**] इत्यन्त्यस्वरादिलोपः, सुरासयतीति क्विप्, ***णेरनिटि*** [**सिद्धहेम.४।३।८३**] इति णिज्लोपः, क्विब्लोपे, नामत्वे, प्रथमैकवचनत्वे,

---

1 *......*एतच्चिह्नान्तर्गतः पाठः अ.१ मध्ये नास्ति ।

2 क्विपि तस्य लोपे पा.१, क्विप् इति क्विप् सु.१ ।

3 समानानां तेन अ.२ ।

4 दीर्घङ्याब्व्यञ्जनात् सेः ।

5 सिद्धम् इति अ.२ विना नास्ति ।

6 गवक्षेपः पा.१ ।

7 लुकि अ.३, लुप् पा.२, लोपे पा.१ ।

8 णिज्बहुलं नाम्नः कृगादिषु ।

*दीर्घङ्याब्*[1] [**सिद्धहेम.१।४।४५**] इत्यादिना तस्य लोपे, ***सो रुः*** [**सिद्धहेम.२।१।७२**] इति सस्य रुत्वे, विसर्गादेशे च सति **सुरा** इति सिद्धम् ॥८॥

**जिन०** [8.1] *"वन षण संभक्तौ"* [सिद्ध.धातु. 329-330] इत्यस्य आनिवि **वनानि** इति सिद्धम् । [8.2] **ब्राह्मणै**रिति हे ब्राह्मण ! ऐः = गतोऽसि इत्यर्थः । [8.3] **अमी**ति अमशब्दान्मत्वर्थीये ङि(इ)नि सिद्धिः । [8.4] **वृक्षा** इति वृक्षमस्यतीति वाक्ये क्विपि, प्रथमा - सौ रूपम् । [8.5] **पचन्ती**ति पचतेः शत्रन्ता[द्] ङ्यां, आमन्त्र्य-सौ रूपम् । [8.6] **येषामि**ति *"येषृङ् प्रयत्ने"* [सिद्ध.धातु. 835] येषणं येषः, *"क्तेटो गुरोः०"* [सिद्ध.हेम. 5।3।106] इति अः, द्वितीया - अमि सिद्धिः । [8.7] **यान्** इति यातेः शत्रन्तस्य सौ रुपम् । [8.8] **वायुभ्य** इति अग्निभ्यवत् । [8.9] **पार्थिवा** इति हे पार्थिव ! अः=विष्णुः । **वृक्षा** इति बधा (यथा?) [8.10.1] **सुरा** इति शोभनो राः सुराः, *"आ रायो व्यञ्जने"* [सिद्धहेम. 2।1।5] इति रैशब्दस्य सौ । [8.10.2] सुरां सुनोति इति सुरासुत्, सुरासुतमाचष्टे इति णिचि, त्रन्त्यस्वरादिलोपे, सुरासयतीति क्विपि, णिलोपे, प्रथमा-सौ, **सुरा** इति सिद्धम् ।।8।।

1 दीर्घङ्याब्व्यञ्जनात् सेः ।

**शेषाणि पूर्वाणि समान्यजानां फलानि मूलानि हलान्यगूनाम् ।**
**अभ्राणि नीलानि दलान्यतस्यः शूलानि [1]कूलानि तटान्यपापाः ।।९।।**

**गुण०** [९.१]पूर्वस्मिन् इह वक्ष्यमाणे च श्लोके प्रथमाद्विती यादिबहुवचनान्तप्रतिरूपकाण्येकवचनान्तानि कथं भवन्ति ? वयमत्र ब्रूमः, ***कष शिष*** [**सिद्ध.धातु.५०७-५०८**] इत्यादिदण्डकधातुः[2], पञ्चम्या आनिवि, शवि, ***लघोरुपान्त्यस्य*** [**सिद्धहेम.४।३।४**] इति गुणे, समानदीर्घत्वे, [3]***रषृवर्णा*** [**सिद्धहेम.२।३।६३**] इत्यादिना णत्वे, [4]**शेषाणि** इति सिद्धम् ।

[९.२] [९.३]**पूर्वाणि**, **समानि** इति, ***पूर्व पर्व मर्व पूरणे*** [**सिद्ध.धातु.४५४-४५६**], ***षम ष्टम वैक्लव्ये*** [**सिद्ध.धातु.३८९-३९०**], भ्वादौ परस्मैपदिनौ, ***षः सोऽष्ट्यै***[5] [**सिद्धहेम.२।३।९८**] इत्यादिना षस्य सः, शेषं पूर्ववत् ।

[९.४]**अजानाम्** इति, ***ज्ञांश् अवबोधने*** [**सिद्ध. धातु.१५४०**], ह्यस्तन्या अम्व्, ***क्र्यादेः*** [**सिद्धहेम.३।४।७९**] इति श्नाप्रत्ययः, ***जा ज्ञाजनोऽत्यादौ*** [**सिद्धहेम.४।२।१०४**] इति जादेशः, अडागमः, समानदीर्घत्वं च, **अजानाम्** इति सिद्धम् ।

[९.५]**फलानि,** [९.६]**मूलानि**, [९.७]**हलानि** इति, ***फल***

---

1 मूलानि अ.३ ।

2 विपूर्वकः सु.१, अ.२ विना सर्वप्रतेषु ।

3 रषृवर्णान्नो ण एकपदेऽनन्त्यस्यालचटतवर्गशसान्तरे ।

4 विशेषाणि अ.३, अ.१ ।

5 षः सोऽष्ट्यैष्ठिवष्वष्कः ।

***निष्पत्तौ*** [**सिद्ध.धातु.४२८**], ***मूल प्रतिष्ठायाम्*** [**सिद्ध.धातु.४२७**], ***हल विलेखने*** [**सिद्ध.धातु.९७७**], शेषं पूर्वाणिवत् ।

[९.८]**अगूनाम्** इति, नञ्पूर्वस्य गोशब्दस्य न विद्यते गौर्येषां तेऽगवः तेषाम् अगूनाम्, ***गोश्चान्ते***[1] [**सिद्धहेम.२।४।९६**] इत्यादिना ह्रस्वत्वे, षष्ठ्या आम्, ***ह्रस्वापश्च*** [**सिद्धहेम.१।४।३२**] इत्यामो [2]नामि, ***दीर्घो नामि***[3] [**सिद्धहेम.१।४।४७**] इत्यादिना दीर्घत्वे, इत्थं बहुवचनान्तं सिद्ध्यति। [4]एकवचनान्तं तु ***गुंत् पुरीषोत्सर्गे*** [**सिद्ध.धातु.१४२७**] गुवति स्मेति, ***गत्यर्थाकर्मक***[5] [**सिद्धहेम.५।१।११**] इत्यादिना कर्तरि क्ते, ***दुगोरू च*** [**सिद्धहेम.४।२।७७**] इति क्ततकारस्य नत्वे धातोरुकारे च ततो नञ्समासे स्त्रियाम् अपि । *[6]इत्थम् एकवचनान्तं सिद्धम्* ।

[९.९]**अभ्राणि**, [९.१०]**नीलानि**, [९.११][7]**दलानि** इत्यादि, ***अभ्र बभ्र मभ्र गतौ*** [**सिद्ध.धातु.४०७-४०९**], [8]***णील वर्णे*** [**सिद्ध.धातु.४२०**], [9]***दल ञिफला विशरणे*** [**सिद्ध.**

---

1 गोश्चान्ते ह्रस्वोऽनंशिसमासेयोबहुव्रीहौ ।

2 इत्यादिना नामि सु.१ ।

3 दीर्घो नाम्यतिसृचतसृप्रः ।

4 द्विवचनान्तस्तु अ.३, पा.२, सु.१, द्विवचनान्तं पा.१ ।

5 गत्यर्थाकर्मकपिबभुजेः ।

6 *....*एतच्चिह्नान्तर्गतः पाठः पा.२ मध्ये नास्ति ।

7 बलानि इति अ.२ मध्ये अधिकम् ।

8 णील वर्णे अ.३, पा.२, अ.२ मध्ये नास्ति ।

9 बल प्राधान्यावरोधयोः अ.३, अ.२, बल प्राणनधान्यावरोधयोः इति पा.२ मध्ये अधिकम् ।

**धातु.४१३-४१४**], पञ्चम्यादि[1] शेषं पूर्ववत् ।

[९.१२]**अतस्य** इति, अतसीशब्दस्य प्रथमाबहुवचनान्तस्याशङ्का, इह त्वेकवचनान्ते कार्यम् । ***तसू दसूच् उपक्षये*** [**सिद्ध.धातु.१२२४-२५**] ह्यस्तन्याः सिव्, ***दिवादेः श्यः*** [**सिद्धहेम.३।४।७२**] इति श्यप्रत्ययः, अडागमे, ***सो रुः*** [**सिद्धहेम.२।१।७२**] इति सस्य रुत्वे, विसर्गादेशे च **अतस्य** इति सिद्धम् ।

[९.१३]**शूलानि**, [९.१४]**कूलानि**, [९.१५]**तटानि** इति, ***शूल रुजायाम्*** [**सिद्ध.धातु.४२४**], ***कूल आवरणे*** [**सिद्ध.धातु.९८१**], ***तट*** [2]***समुच्छ्राये*** [**सिद्ध.धातु.१८५**] आनिवादि पूर्ववत् ।

[९.१६]**अपापा** इति यङ्लुबन्तः, [3]पूर्ववद् ॥९॥

**जिन०** पूर्वस्मिन्निहोत्तरत्र च प्रथमा-द्वितीया-दिबहुवचनान्तप्रतिरूपकाणि, एकवचतान्तानि कथं भवन्तीति प्रश्ने ब्रूमः । [9.1] *"कषशिष०"* [सिद्ध.धातु. 507-508] इति दण्डकधातोरानिवि **शेषाणि** इति सिद्धम् । [9.2] *"पूर्व पर्व मर्व पूरणे"* [सिद्ध.धातु. 454-456] इत्यस्य **पूर्वाणि** । [9.3.1] *"षम ष्टम वैक्लव्ये"* [सिद्ध.धातु.

---

1 पञ्चम्या हि अ.२ ।

2 धातुपाठे तु उच्छ्राये ।

3 वदेव अ.१ ।

389-390] इत्यस्य **समानि** । [9.3.2] तथा = अथवा सम्मम् आनयति यत् कुलं तत् **समानि** क्लीबे सौ अमि वा रूपम् । एवं **फलानी**त्यादयोऽपि । [9.4] **अजानामि**ति जानातेर्ह्यस्तन्या अम्वि । [9.5] **फलानी**ति *"फल निष्पत्तौ"* [सिद्ध.धातु. 428] । [9.6] **मूलानी**ति *"मूल प्रतिष्ठायाम्"* [सिद्ध.धातु. 427] । [9.7] **हलानी**ति *"हल विलेखने"* [सिद्ध.धातु. 977] आनिवि त्रयाणामपि सिद्धिः । [9.8] **अगूनामि**ति न विद्यते गौर्येषां ते अगवस्तेषाम् अगूनामित्थं तावद् बहुवचनान्तम्, एकवचनान्तं तु गुवतेः क्ते *"दुगोरू च"* [सिद्धहेम. 4।2।77] इति नत्वे रुत्वे च गूनं, न विद्यते गूनं यस्याः सा **अगूनाम्** । [9.9] **अभ्राणी**ति *"अभ्र बभ्र मभ्र गतौ"* [सिद्ध.धातु. 407-409] । [9.10] **नीलानी**ति *"नील वर्णे"* [सिद्ध.धातु. 420] । [9.11] **दलानी**ति *"दल त्रिफला विशरणे"* [सिद्ध.धातु. 413-414] । आनिवि सर्वे सिद्धाः । [9.12] **अतस्य** इति अतसीराव्य (अतसीशब्दाज्) जसि बहुवचनान्तम्, [एकवचनान्तं] तु तस्यतेर्ह्यस्तनी - सिवि सिद्धम् । [9.13] **शूलानी**ति *"शूल रूजायाम्"* [सिद्ध.धातु. 424] । [9.14] **कूलानी**ति *"कूल आवरणे* [सिद्ध.धातु. 981] । [9.15] **तटानी**ति *"तट उच्छ्राये"* [सिद्ध.धातु. 185] । [9.16] **अपापा** इति अपपूर्वस्य पातेः सिविरूपम् । एवमेतान्यप्येकवचनान्तानि ज्ञेयानि । तद्यथा -

***यूथानि गूथानि घृतानि रात्रीः, क्षीराणि वृत्तानि दिवान्यजागाः ।***
***सुखानि शूराणि तृणान्यदानि, स्थूलानि सूत्राणि मूढान्यराराः ।।1।।***

[9.17.1] तत्र यूथेन अनिति = प्राणितीत्येवं शीलं **यूथानि** कूलं । [9.17.2] यूथमानयतीति वा **यूथानि** कूलम् । [9.18] एवं **गूथानि** = वराहकुलम् । [9.19] **घृतानि** कुलम् । [9.20] **रात्रीरि**ति रात्रिमिच्छतीति क्यनि, दीर्घत्वे च रात्रीयतीति क्विपि *"अतः"* [सिद्धहेम. 4।3।82] इत्यकारलोपे *"य्वोः प्वय्व्यञ्जने लुक्"* [सिद्धहेम. 4।4।121] इति यलोपे प्रथमा सौ सिद्धम् । [9.21] **क्षीराणी**ति क्षीरमणतीत्येवं **क्षीराणि** कुलम् । एवं [9.22] **शूराणि**, [9.23] **सूत्राणी**त्येतेऽपि साध्ये । तथा [9.24] **वृत्तानि** [9.25] **दिवानि**, [9.26] **सुखानि**, [9.27] **तृणानि**, [9.28] **स्थूलानि**, [9.29] **मूढानी**त्येतान्यपि यूथानिवत् साध्यानि । [9.30] **अदानी**ति न विद्यते दं = कलत्रं येषां कुलानां [इ]**त्यदानि** इति बहुवचनान्तम्, [एकवचनान्तं] तु अत्तेरानिवि सिद्धम् । [9.31] **अ[जा]गा** इति अजां गच्छतीति **अजागाः**, एकवचनान्तं तु गायते गीयतेर्वा यङ्लुपि सिवि च सिद्धम् । [9.32] **अरारा** इति अरान् इप्रती (?) ति वाक्ये *"कर्मणोऽण्"* [सिद्धहेम. 5।1।72] इत्यणि वृद्धौ जसि, जव (?) रुपम् । एकवचनान्तं तु रातेर्यङ्लुपि सिवि च सिद्धम् ।

इति प्रासङ्गिककवृत्तार्थः ।।9।।

**[1]*सुखानि शीलानि नखान्य[2]सास्नाः**
**खलानि पापानि बलान्यचर्चाः ।**
**पुराणि वर्षाणि मठान्यमीनाः**
**घनानि सर्वाणि बिलान्यपां च ॥१०॥**

**गुण०** कथम् एकत्वम् इति वर्तते,* [१०.१.१] ***सुख दुःखण् तत्क्रियायाम्*** [**सिद्ध.धातु.१८४९-५०**] इत्यस्य ***चुरादिभ्यो णिच्*** [**सिद्धहेम.३।४।१७**] इति णिचि, ***अतः*** [**सिद्धहेम.४।३।८२**] इत्यकारलोपे, सुखयतीति वाक्ये, अचि, ***णेरनिटि*** [**सिद्धहेम.४।३।८३**] इति णिज्लुकि, सुखम् इवाचरतीति वाक्ये, ***कर्तुः क्विप्*** [**सिद्धहेम.३।४।२५**] इति क्विप्, तस्य लोपे, ***क्रियार्थो धातुः*** [**सिद्धहेम.३।३।३**] इति धातुत्वे, पञ्चम्या आनिवि, शवि, समानदीर्घत्वे च **सुखानि** इति सिद्धम्। [१०.१.२] अथवा शोभना खानयो यत्र कुल इति विग्रहे प्रथमैकवचने ***अनतो लुप्*** [**सिद्धहेम.१।४।५९**] इति तस्य लोपे, [१०.१.३]यद्वा सुखम् आनयति यत् कुलं क्विपि, तस्य लोपे, ***क्लीबे*** [**सिद्धहेम.२।४।९७**] इति ह्रस्वत्वे शेषं पूर्ववत्। एवं प्रकारत्रयेण **सुखानि** इति सिद्धम्। [१०.१.४] चतुर्थस्तु सुखेनानितीत्येवं शीलम् इति पूर्वोक्तमेव।

---

1 *...*एतच्चिह्नान्तर्गतः पाठः अ.१ मध्ये नास्ति।

2 खानि सास्नाः अ.३।

[१०.२]**शीलानि**, [१०.३]**नखानि** इति ***शील समाधौ*** [**सिद्ध.धातु.४२१**], उख नख इत्यादिना गत्यर्थो ***नख*** [**सिद्ध. धातु.६४**] धातुरानिवादि पूर्ववत् ।

[१०.४]**असास्ना** इति, न विद्यते सास्ना = गलकम्बलो येषां ते तथेति प्रथमाबहुवचने सिद्ध्यति, इह[1]त्वेकत्वे प्रकृतं तदुच्यते, ***ष्णांक् शौचे*** [**सिद्ध.धातु.१०६४**], ***षः सोऽष्ट्यै*** [**सिद्धहेम.२।३।९८**] इत्यादिना षकारस्य सकारः, ***निमित्ताभावे नैमित्तिकस्याप्यभावः*** [**न्या. सं. १।२९**] इति [2]→णकारस्य नकारः, अत्यर्थं स्नातीति ***व्यञ्जनादेः***[४] [**सिद्धहेम.३।४।९**] इत्यादिना यङि, तस्य लुपि, ***सन्यङश्च*** [**सिद्धहेम.४।१।३**] इति द्वित्वे, ***व्यञ्जनस्यानादेर्लुक्*** [**सिद्धहेम.४।१।४४**] इत्यनादिव्यञ्जनलुकि, ***ह्रस्वः*** [**सिद्धहेम.४।१।३९**] इति पूर्वस्य ह्रस्वत्वे, ***आगुणावन्यादेः*** [**सिद्धहेम.४।१।४८**] इति पूर्वस्या←कारस्याकारे, ह्यस्तन्या सिवि, अडागमे, सस्य रुत्वे, विसर्गादेशे च **सत्यसास्ना** इति सिद्धम् ।

[१०.५]**खलानि** इति ***खल सञ्चये च*** [**सिद्ध.धातु.४४९**], पञ्चम्या आनिवि, शवि, समानदीर्घत्वे **खलानि** इति सिद्धम् ।

[१०.६]**पापानि** इति, [3]***पां पाने*** [***सिद्ध.धातु.२***], ***पांक्***

1 इह तु प्रकृतं सु.१ विना सर्वप्रतेषु ।

2 →.....← एतच्चिह्नान्तर्गतः पाठः अ.२ मध्ये नास्ति ।

3 पांक् रक्षणे इत्येव अ.३, पा.२, सु.१, अ.२ । पां पाने पांक् रक्षणे वा यङ्लुबन्तः पञ्चम्या आनिवि.. अ.१ ।

***रक्षणे*** [**सिद्ध.धातु.१०६७**] वा, ***व्यञ्जनादेः***[1] [**सिद्धहेम.३।४।९**] इत्यादिना यङि, तस्य लुपि, ***सन्यङश्च*** [**सिद्धहेम.४।१।३**] इति द्वित्वे, ह्रस्वत्वे, ***आगुणावन्यादेः*** [**सिद्धहेम.४।१।४८**] इत्यकारस्याकारे, पञ्चम्या आनिवि, समानदीर्घत्वे च **पापानि** इति सिद्धम् ।

[१०.७]**बलानि** इति ***बल*** [2]***प्राणने*** [**सिद्ध.धातु.९७९**] आनिवि **बलानि** ।

[१०.८]**अचर्चा** इति, ***चर्चण् अध्ययने*** [**सिद्ध.धातु.१७२९**], चर्चनं चर्चा, ***भीषिभूषि***[3] [**सिद्धहेम.५।३।१०९**] इत्यादिनाङि, ***आत्*** [**सिद्धहेम.२।४।१८**] इत्यापि, समानदीर्घत्वे, न विद्यते चर्चा = पाठविशेषो येषां ते तथा इति प्रथमाबहुवचनान्तम्, [4]इह त्वेकत्वम् इति प्रथमैकवचनान्तं तत् कथम् इत्युच्यते, चर्चेवाचरति, ***कर्तुः क्विप्***[5] [**सिद्धहेम.३।४।२५**] इति क्विपि तस्य लोपे, ***क्रियार्थो धातुः*** [**सिद्धहेम.३।३।३**] इति धातुत्वे, ह्यस्तन्याः सिवि, अडागमे, समानदीर्घत्वे, सस्य रुत्वे, विसर्गादेशे च **सत्यचर्चा** इति [6]सिद्धम् ।

[१०.९]**पुराणि**, [१०.१०]**वर्षाणि**, [१०.११]**मठानि** इति, ***पुरत् अग्रगमने*** [**सिद्ध.धातु.१३९५**], पञ्चम्या आनिवि,

---

1 व्यञ्जनादेरेकस्वराद् भृशाभीक्ष्ण्ये यङ्वा ।

2 धातुपाठे तु प्राणनधान्यावरोधयोः ।

3 भीषिभूषिचिन्तिपूजिकथिकुम्बिचर्चिस्पृहितोलिदोलिभ्यः ।

4 इहत्वेकवचनान्तं कथं पा.१ ।

5 कर्तुः क्विप् गल्भक्लीबहोडात्तु ङित् ।

6 सिद्धिमयासीत् अ.२ ।

***तुदादेः शः*** [**सिद्धहेम.३।४।८१**] इति शे, समानदीर्घत्वे, ***रषृवर्णा***[1] [**सिद्धहेम.२।३।६३**] इत्यादिना णत्वे **पुराणि** इति सिद्धम् । ***जिषू विषू मिषू निषू पृषू*** [2]***वृषू सेच(सह)ने*** [**सिद्ध.धातु.५२२-५२७**], आनिवि, शवि, ***लघोरुपान्त्यस्य*** [**सिद्धहेम.४।३।४**] इति गुणे, शेषं पूर्ववत्, **वर्षाणि** इति सिद्धम् । [3]→****मठ मद निवासयोश्च*** [**सिद्ध.धातु.२१५-२१६**], शेषं पूर्ववत्,* **मठानि** इति सिद्धम् ।←

[१०.१२]**अमीना** इति, न विद्यन्ते मीना येषु तडागेषु तेऽमीना इति बहुवचनान्ते, एकत्वं तु प्रकृतम्, तत् कथ्यते, ***मींग्श् हिंसायाम्*** [**सिद्ध.धातु.१५१२**] ह्यस्तन्याः सिवि, ***क्र्यादेः*** [**सिद्धहेम.३।४।७९**] इति श्नाप्रत्यये, अडागमे, सस्य रुत्वे, विसर्गादेशे च सिद्धम् **अमीना** इति ।

[१०.१३]**घनानि** इति घन इवाचरति, ***कर्तुः क्विप्*** [**सिद्धहेम.३।४।२५**] इति क्विपि, तस्य लोपे, ***क्रियार्थो धातुः*** [**सिद्धहेम.३।३।३**] इति धातुत्वे, पञ्चम्या आनिवि, शवि, समानदीर्घत्वे च **घनानि** इति सिद्धम् ।

[१०.१४]**सर्वाणि** घनानिवत् ।

---

1 रषृवर्णान्नो ण एकपदेऽनन्त्यस्यालचटतवर्गशसान्तरे ।

2 धातुपाठे तु जिषू वृषु मृषु सहने च ।

3 *...*एतच्छिह्नान्तर्गतः पाठः अ.३, पा.२, अ.२ मध्ये नास्ति । →...← इत्यन्तर्गत पाठः पा.३ मध्ये नास्ति ।

[१०.१५]**बिलानि** इति [1]***बिलत् भेदने*** [**सिद्ध.धातु.१४०९**], आनिवि, ***तुदादेः शः*** [**सिद्धहेम.३।४।८१**] इति [शे], **बिलानि** इति सिद्धम् ।

[१०.१६][2]तदेवं ***पांक् रक्षणे*** [**सिद्ध.धातु.१०६७**], ह्यस्तन्या अम्व्, समानदीर्घः, अडागमः, **अपाम्** इति सिद्धम् । अथवा **पां पाने** [**सिद्ध.धातु.२**], अम्, सिच्, ***पिब***[3] [**सिद्धहेम.४।३।६६**] इत्यादिना तस्य लुप्, न चेट्, शेषं पूर्ववत् । चकारोऽनुक्तसमुच्चयार्थः। तेनानुक्तम् अपि सञ्चिनोतीति ।

[१०.१७]**भवति** इत्यत्याद्यन्तं शतृप्रत्यये सप्तम्येकवचनान्तम्, डीप्रत्ययान्तं च, आमन्त्र्ये सौ, ***नित्यदिद् द्विस्वराम्बार्थस्य ह्रस्वः*** [**सिद्धहेम.१।४।४३**] इत्यादिना सिना सह ह्रस्वत्वे, इत्थङ्कारं **भवति** इति पदं सम्भवति ।

[4]तथान्येऽप्येवञ्जातीयाः [5]स्वरूपाभिन्नाः [6]शब्दाः स्वबुद्ध्यानुसर्तव्याः ॥१०॥

**जिन०** कथमेकत्वमिति वर्त्तते । [10.1.1] सुखमिवाचरतीति वाक्ये *"कर्त्तुःक्विप्०"* [सिद्धहेम.

1 बिलद् भेदने अ.१, अ.३, बिल भेदने अ.२ । बिलत् भेदे पा.१ ।
2 तच्चैवं अ.२ विना सर्वप्रतेषु ।
3 पिबैतिदाभूस्थः सिचो लुप् परस्मै न चेट् ।
4 तथाचैवं जातीयाः स्वरूपाभिन्नाः स्वबु अ.२ ।
5 जातीयस्वरूपा पा.१, अ.३ अ.१, स्वरूपाः स्वबु. अ.१ ।
6 सु.१ विना नास्ति ।

3।4।25] इति क्विप्, तल्लोपे *"क्रियार्थो धातुः"* [सिद्धहेम. 3।3।3] इति धातुत्वे आनिवि च **सुखानि** इति सिद्धम् । [10.1.2] शोभनाः खनयो यत्र कुले तत् **सुखानि** कुलानि । [10.1.3] यद्वा सुखमानयतीति । [10.1.4] यदिवा सुखेन अत्तीति । [10.2] **शीलानी**ति *"शील समाधौ"* [सिद्ध.धातु. 421] इत्यस्य । [10.3] **नखानी**ति च *"उष णष"* [सिद्ध.धातु. 63-64] इति दण्डकधातोरानिवि रुपम् । [10.4] **असास्ना** इति न विद्यते सास्ना = गलकम्बलो येषां ते **असास्ना** इति बहुवचनान्तं, प्रकृतं त्वेकवचनान्तं, तच्च स्नाते र्यङ्लुपि सिवि च सिद्धम् । [10.5] **खलानीति** *"खल सञ्चये च"* [सिद्ध.धातु. 449] इत्यस्यानिवि रुपम् । [10.6] **पापानी**ति पातेर्यङ्लुबन्तस्यानिवि रुपम् । [10.7] **बलानी**ति *"बल प्राणा(णन)धान्यावरोधयोः"* [सिद्ध.धातु. 979] इत्यस्यानिवि । [10.8] **अचर्चा** इति न विद्यते चर्चा = पाठविशेषो येषां ते अचर्चा इति बहुवचनान्तम्, एकवचनान्तं तु चर्चेवाचरति *"कर्तुः क्विप्०"* [सिद्धहेम. 3।4।25] इति क्विपि नामधातुत्वे सिवि च सिद्धम् । [10.9] **पुराणी**ति *"पुरत् अग्रगमने"* [सिद्ध.धातु. 1395] । [10.10] **वर्षाणी**ति वर्षतेः । [10.11] **मठानी**ति *"मठ मद निवासयोश्च"* [सिद्ध. धातु. 215] त्रयेऽप्यानिवि सिद्धाः । [10.12] **अमीना** इति न विद्यन्ते मीना येषु ते अमीनास्तडागा इति बहुत्वे, एकत्वे

तु मीनातेः सिवि । [10.13.1] **घनानी**ति [10.14.1] **सर्वाणी**ति घन इवाचरति, सर्व इवाचरतीति वाक्ये आचार क्विपि नामधातुत्वे, आनिवि च सिद्धाः । [10.13.2] घनेनानितीत्येवं शीलं **घनानि** [10.14.2] सर्वमणतीत्येवं शीलं **सर्वाणि** कुलमिति वा । [10.15] **बिलानी**ति *"बिलत् भेदने"* [सिद्ध.धातु. 1409] [10.16] **अपामि**ति पातेरम्वि पिबतेर्वा अमि रूपम् ।

चकारोऽनुक्तसमुच्चये । [10.17] नभ**(भव)ती**त्यत्याद्यन्तं भवतेः शतरि सप्तमी, ङ्यौ वाऽऽमन्त्र्ये-सौ **भवति** इति रूपम् । [10.18] **जगाम नगमे(रे)** रूपं जगिच्छान्दसः । जगिमाचष्टे इति वाक्ये णिचि, *"नामिनोऽकलिहलेः"* [सिद्धहेम. 4।3।51] इति वृद्धौ, अन्त्यस्वरादिलोपे, जगयतीति क्विपि, णिलोपे च जग् इति सिद्धम् । पु[न]राचारक्विबन्तादामवि सिद्धं **जगाम** इति । [10.19] **वृक्षेणे**ति न टान्तं, वृक्षे=तरौ अण इति पदप्रश्लेषात् । [10.20] **ममे**ति पदं त्याद्यन्तं मातेः परोक्षा - अप्रत्यये **मम** इति सिद्धः (द्धम्) । एवमन्येप्यूह्याः ।।10।।

**अधीये नोपसृष्टस्य शक्यतीत्यस्य साधुता ।**
**जागर्तीति न जागर्तेरुच्यतीत्यस्य[1] साधुता ॥११॥**

**गुण०** [११.१]**अधीये** इति, *इंङ्क् अध्ययने* [**सिद्ध.**

1 तीतिच सा. अ.२ ।

**धातु.११०४**] वर्तमाना- ए, [1]अध्युपसर्गोपसृष्टम्, ततो ***धातोरिवर्ण***[2] [**सिद्धहेम.२।१।५०**] इत्यादिना इयादेशे, [3]अधीये इति [4]सिध्यति। विपर्यये तु ***धींग्च् अनादरे*** [**सिद्ध.धातु.१२४५**], ह्यस्तन्या इ, ***दिवादेः श्यः*** [**सिद्धहेम.३।४।७२**] इति श्ये, ***अवर्णस्य***[5] [**सिद्धहेम.१।२।६**] इत्यादिनाकारस्येकारेण सह एकारे, अडागमे च [6]अधीये इति सिद्धम् ।

[११.२]**शक्यती**त्यस्य साधुता, ***शक्लृंट् शक्तौ*** [**सिद्ध.धातु.१३००**], वर्तमाना- [7]ते, क्ये, शक्यते इति भाव्यम्। विपर्ययरूपं तु ***शकींच् मर्षणे*** [**सिद्ध.धातु.१२८०**] वर्तमाना-तिव्, श्ये, **शक्यति** इति।

[११.३]**जागर्ती**ति न जागर्तेरिति, ***जागृक् निद्राक्षये*** [**सिद्ध.धातु.१०९३**], वर्तमाना-तिव्, गुणे, जागर्ति रूपम्, [8]धात्वन्तरस्य कथम् ? इत्युच्यते, ***गॄत् निगरणे*** [**सिद्ध.धातु.१३३५**] इत्यस्य गर्हितं [9]गिरतीति वाक्ये, ***गॄलुपसदचर***[10][**सिद्धहेम.३।४।१२**]

---

1 अध्युपसृष्टं पा.२ ।

2 धातोरिवर्णोवर्णस्येयुव् स्वरे प्रत्यये ।

3 अधीयेत पा.१ ।

4 इति सिद्धम् अ.२ ।

5 अवर्णस्येवर्णादिनैदोदरल् ।

6 अधीयते पा.१ ।

7 ए अ.३, पा.२ ।

8 धात्वन्तरस्य पा.१ मध्ये नास्ति। रूपं कथं धात्व० अ.२ ।

9 गरती अ.१, अ.२, पा.२ ।

10 गॄलुपसदचरजपजभदशदहो गर्ह्ये ।

इत्यादिना यङि, तस्य लुपि, ***सन्यङश्च*** [**सिद्धहेम.४।१।३**] इति द्वित्वे, ***ह्रस्वः*** [**सिद्धहेम.४।१।३९**] इति पूर्वस्य ह्रस्वत्वे, ***ऋतोऽत्*** [**सिद्धहेम.४।१।३८**] इति ऋकारस्याकारे, ***गहोर्जः*** [**सिद्धहेम.४।१।४०**] इति गस्य जत्वे, ***आगुणावन्यादेः*** [**सिद्धहेम.४।१।४८**] इत्यकारस्याकारः, वर्तमाना-तिव्, [1]***लघोरुपान्त्यस्य*** [**सिद्धहेम.४।३।४**] इति गुणे **जागर्ति** इति सिद्धम् ।

[११.४][2]**उच्यती**त्यस्य साधुता, ***वचंक्*** [3]***भाषणे*** [**सिद्ध.धातु.१०९६**], वर्तमाना-ते, ***क्यः शिति*** [**सिद्धहेम.३।४।७०**] इति क्ये, ***यजादिवचेः किति*** [**सिद्धहेम.४।१।७९**] इति य्वृति, उच्यते इति प्राप्नोति । उच्यतीति यथा सम्भवति तथा प्रक्रमः, ***उचच् समवाये*** [**सिद्ध.धातु.११७६**] वर्तमाना-तिवि, ***दिवादेः श्यः*** [**सिद्धहेम.३।४।७२**] इति श्ये, **उच्यति** इति सिध्यति ॥११॥

**जिन०** [11.1] अधिपूर्वस्य इङो वर्तमाना-ए *"धातोरिवर्ण०"* [सिद्ध.हेम. 2।1।50] इति इयादेशे **अधीये** इति सिद्धम् । अनुपसृष्टं तु *"धींग्च् अनादरे"* [सिद्ध.धातु. 1245] इत्यस्य ह्यस्तन्या - इवचने श्ये च **अधीये** इति सिद्धम् । [11.2] **शक्यती**ति *"शकींच् मर्षणे"* [सिद्ध.धातु.

1 नामिनो गुणो इत्यादिना० पा.२ ।

2 तीति च सा० अ.२ ।

3 परिभाषणे पा.२, अ.२ ।

1280] । [11.3] **जागर्त्ती**ति *"गॄ निगरणे"* [सिद्ध. धातु. 1335] गर्हितं गिरतीति *"गॄलुपसदचर०"* [सिद्धहेम. 3।4।12] इति यङि, तल्लुपि, द्वित्वे, ह्रस्वे *"ऋतोऽत्"* [सिद्धहेम. 4।1।38] इत्यृकास्य अकारे, *"गहोर्जः"* [सिद्धहेम. 4।1।40] इति जे, *"आगुणावन्यादेः"* [सिद्धहेम. 4।1।48] इत्याकारे तिवि सिद्धम् । [11.4] **उच्यती**ति *"उचच् समवाये"* [सिद्ध.धातु. 1176] ।।11।।

**अस्यन्निति न शत्रन्तं व्याघ्रा इत्यस्य चैकता ।**
**बहुत्वं च तथैतेषामसुर्मेषारूरेव [1]च ॥१२॥**

**गुण०** [१२.१]**अस्यन्** इति, ***असूच् क्षेपणे*** [**सिद्ध. धातु.१२२१**] इत्यस्य शतृप्रत्ययान्तस्य ***दिवादेः श्यः*** [**सिद्धहेम.३।४।७२**] इति श्ये, प्रथमैकत्वेन [2]रूपम्, [3]अपि च ***षोंच्*** [4]***अन्तकर्मणि*** [**सिद्ध.धातु.११५०**] इत्यस्य ***षः सोऽष्ट्यै***[5] [**सिद्धहेम.२।३।९८**] इत्यादिना षस्य से, ह्यस्तन्या अनि, ***दिवादेः श्यः*** [**सिद्धहेम.३।४।७२**] इति श्ये, ***ओतः श्ये*** [**सिद्धहेम.४।२।१०३**] इत्योकारलोपे, अडागमे च सिद्धम् **अस्यन्** इति ।

---

1 वचः सु.१ ।
2 कवचनत्वे तु रूपम् अ.२ विना सर्वप्रतेषु । त्वे रूपम् पा.२ ।
3 अपितु अ.१, पा.१ विना सर्वप्रतेषु ।
4 न्तः क० पा.१, अ.२ ।
5 षः सोऽष्ट्यैष्ठिवष्वष्कः ।

[१२.२]**व्याघ्रा** इत्यस्य चैकता इति, व्याघ्रशब्दस्य जसि नेदम्, किन्तु ***घ्रां गन्धोपादाने*** **[सिद्ध.धातु.३]** इत्यस्य व्याङ्[1]पूर्वकः, अद्यतनी-सिः, सिच्, ***ट्धेघ्राशाछासो वा*** **[सिद्धहेम.४।३।६७]** इति सिज्लुपि, अडागमे, सस्य रुत्वे, विसर्गादेशे च सति **व्याघ्रा** इति सिद्धम् ।

[१२.३]बहुत्वं च तथैतेषाम् **असुर्मेषारूरेव** चेति, असुशब्दः प्राणपर्यायः, मेषशब्दो वृष्णिवाचकः, [2]आमन्त्र्यान्तोऽरूस्शब्दो व्रणवाचकः, एतान्येकवचनान्तानि, बहुवचनान्तानि कथम् ? इत्युच्यते, ***षोंच्*** [3]***अन्तकर्मणि*** **[सिद्ध.धातु.११५०]** इत्यस्य ***षः सोऽष्ट्यै***[4] **[सिद्धहेम.२।३।९८]** इत्यादिना षस्य सः, ***आत् सन्ध्यक्षरस्य*** **[सिद्धहेम.४।२।१]** इत्योकारस्याकारः, अद्यतनी-अन्, सिच्, ***सिज्विदोऽभुवः*** **[सिद्धहेम.४।२।९२]** इति पुसादेशः, [5]***ट्धेघ्रासा***[6] **[सिद्धहेम.४।३।६७]** इति सिचो लुपि, [7]***इडेत्पुसि चातो लुक्*** **[सिद्धहेम.४।३।९४]** इत्याकारलोपे, अडागमे, सस्य रुत्वे, रेफस्य विसर्गे च **असुः** इति सिद्धम् ।

[१२.४]***कष शिष*** **[सिद्ध.धातु.५०७-५०८]** इत्यादौ

---

1 वि आङ् पूर्वकस्य अ.१, पा.१ । वि आङ् पूर्वः अ.२ । आङो पूर्वको पा.२ ।

2 न्ते अ.२, पा.२ विना नास्ति ।

3 न्तः क० अ.२, पा.१ ।

4 षः सोऽष्ट्यैष्ठिवष्वष्कः ।

5 ट्धेघ्रासा.. लुपि इत्येतत् सु.१, अ.३ मध्ये नास्ति ।

6 ट्धेघ्राशाछासो वा ।

7 इडेत्पु... लोपे पा.२, पा.१, अ.१ मध्ये नास्ति ।

***मष हिंसायाम्*** [**सिद्ध.धातु**.५१२], परोक्षा - अ, न च द्वि इत्यधिकारे ***अनादेशादेरेकव्यञ्जनमध्येऽतः*** [**सिद्धहेम.४।१।२४**] इत्युपान्त्याकारस्य एकारे च **मेष** इति सिद्धम् ।

[१२.५]**अरूरिति**, ***रांक्*** [1]***दाने*** [**सिद्ध.धातु**.**१०६९**], ह्यस्तन्या-अनि, ***वा द्विषातोऽनः पुस्*** [**सिद्धहेम.४।२।९१**] इति पुसि, ***इडेत्पुसि चातो लुक्*** [**सिद्धहेम.४।३।९४**] इत्याकारलोपे, अडागमे, सस्य रुत्वे**ऽरूरि**ति सिद्धम् ।

श्लोके चकारोऽनुक्तसमुच्चयार्थः। तेनेदम् अपि सङ्गृहीतम् ।

[१२.६]**पर्वत** इति बहुवचनान्तं कथम् ? इत्युच्यते, ***पूर्व पर्व मर्व पूरणे*** [**सिद्ध.धातु**.४५४-४५६] इत्यस्य शतृप्रत्यये, शवि, ***लुगस्यादेत्यपदे*** [**सिद्धहेम.२।१।११३**] इत्यलोपे, द्वितीयाबहुवचने, शसि, **पर्वत** इति सिद्धम् ।

तथा **आगमोऽनुजगृहे राजसे** आगमशब्दः प्रथमैकवचनान्तोऽनुपूर्वकः । ***जनैचि प्रादुर्भावे*** [**सिद्ध.धातु**.**१२६५**], अनु जातोऽनुजः, ***क्वचित्*** [**सिद्धहेम.५।१।१७१**] इति डे, ***डित्यन्त्यस्वरादेः*** [**सिद्धहेम.२।१।११४**] इत्यन्त्यस्वरादिलोपे, अनुजस्य गृहम् अनुजगृहं ततः सप्तम्येकवचने तदन्तः। सह इना वर्तते से, राज्ञः से तत आमन्त्र्ये सौ, ***अदेतः स्यमोर्लुक्*** [**सिद्धहेम.१।४।४४**] इति सेर्लोपे, इति स्याद्यन्तानि ।

[१२.७]एतान्येव त्याद्यन्तान्युच्यन्ते । ***अम द्रम हम्म मिमृ***

---

1 आदाने अ. २ ।

***गम्लृं गतौ*** **[सिद्ध.धातु.३९२-३९६]** इत्ययं धातुराङ्पूर्वकः, अद्यतनी-सि, ***लृदिद्द्युतादिपुष्यादेः***[1] **[सिद्धहेम.३।४।६४]** इत्यादिनाङि, अडागमे, समानदीर्घत्वे, सस्य रुत्वे, रस्य विसर्गे च **सत्यागम** इति सिद्धम् ।

[१२.८]**अनुजगृहे** इति, [2]अनुपूर्वकः ***ग्रहीश् उपादाने*** **[सिद्ध.धातु.१५१७]**, परोक्षा-ए, [3]****ग्रहव्रस्च***[4] **[सिद्धहेम.४।१।८४]** इत्यादिना य्वृति, द्वित्वे, अनादिव्यञ्जनलोपे, ***ऋतोऽत्*** **[सिद्धहेम.४।१।३८]** इति ऋकारस्याऽकारे, ***गहोर्जः*** **[सिद्धहेम.४।१।४०]** इति सिद्धम्, →[5]गस्य जत्वे च ← **अनुजगृहे** इति सिद्धम् ।

[१२.९]***राजृग् टुभ्राजि दीप्तौ*** **[सिद्ध.धातु.८९३-८९४]** इत्यस्य वर्तमाना-से, शवि, [6]***राजसे** इति सिद्धम् ।

***अट पट*** **[सिद्ध.धातु.१९४-१९५]** इति दण्डकधातुः, ***मठ मद निवासयोश्च*** **[सिद्ध.धातु.२१५]**, ***णट नृत्तौ*** **[सिद्ध.धातु.१०३३]**, [7]***ह्वंग् हरणे*** **[सिद्ध.धातु.८८५]** इत्येतेषां धातूनां

1 लृदिद्द्युतादिपुष्यादेः परस्मै ।

2 अनुपूर्वकः पा.१, अ.१, अ.२ विना नास्ति ।

3 *...*एतच्चिह्नान्तर्गतः पाठः अ.१ मध्ये नास्ति ।

4 ग्रहव्रश्चभ्रस्जप्रच्छः ।

5 →....←एतच्चिह्नान्तर्गतः पाठः पा.२ मध्ये नास्ति ।

6 *...* एतच्चिह्नान्तर्गतः पाठः अ.१ मध्ये नास्ति ।

7 ह्वंग् हरणे पा.२ मध्ये नास्ति ।

पञ्चम्या हौ, शवि, ***अतः प्रत्ययाल्लुक्*** [**सिद्धहेम.४।२।८५**] इति हेर्लोपे, [१२.१०]**पट**, [१२.११][1]**मठ**, [१२.१२]**मद**, [१२.१३]**नट**, [१२.१४]**हर** इत्येते* शब्दाः तिवाद्यन्ताः सिद्धाः । आमन्त्र्यस्यन्ताः[2] तु सुगमाः । [१२.१५]**हरे** इत्यामन्त्र्यस्यन्तो वर्तमाना-ए प्रत्ययान्तस्य[3] ।

[१२.१६]तथा ***व्ययी गतौ*** [**सिद्ध.धातु.९१८**] इत्यस्य, ह्यस्तन्या अम्वि, शवि, ***लुगस्यादेत्यपदे*** [**सिद्धहेम.२।१।११३**] इत्यलोपे च **अव्ययम्** इति सिद्धम् । अनया दिशान्येऽप्यनुसर्तव्याः ॥१२॥

**जिन० [12.1] [अस्यन्निति] षोंच् धातोर्ह्यस्तनी-अनि रूपम् । [12.2] व्याघ्रा इति वि-आङ् पूर्वाज्जिघ्रतेरद्यतनी - सौ, सिचि, *"ट्धेघ्राशाछासो वा"* [सिद्धहेम. 4।3।67] इति सिच् लोपे सिद्धम् । असुः = प्राणवाची, मेषो = वृष्णिवाचक आमन्त्र्यान्तो, अरूस् = व्रणवाची । एतान्येकवचनान्तानि कथम् ? इत्युच्यते - [12.3] असुरिति षोंचः अद्यतनी-अनि । [12.4] मेषेति *"कष शिष०"* [सिद्ध.धातु. 507-508] इति दण्डकधातुमध्यवर्त्तिना मषतेः परोक्षा-अवचने । [12.5] अरुरिति रातेर्ह्यस्तनी-अनि सिद्धम् ।**

1 मठ अ.२, पा.१ मध्ये नास्ति । पठ अ.३, सु.१, अ.१ ।

2 मन्त्र्ये स्य अ.१, अ.२ विना सर्वप्रतेषु ।

3 त्ययाश्च पा.१ ।

चकारोऽनुक्तसमुच्चये । [12.6] तेन **पर्वत** इति बहुवचनान्तं पर्वतेः शतरि द्वितीया-शसि सिद्धम् । [12.7] तथा **आगमः**, [12.8] **अनुजगृहे**, [12.9] **राजसे**, [12.10] **राजगृह** एते न स्याद्यन्ताः किन्तु त्याद्यन्ताः सुगमाश्चैते । तथा [12.11] **पट**, [12.12] **मद**, [12.13] **नट**, [12.14] **हर** एतेऽपि नामन्त्र्यान्ताः किन्तु त्याद्यन्ताः सुगमाश्चैतेऽपि । [12.15] **अव्ययमि**ति न स्याद्यन्तं किन्तु त्याद्यन्तं *"व्ययी गतौ"* [सिद्ध.धातु. 918] इत्यस्य ह्यस्तन्या अमि सिद्धिः । एवमन्येऽपि ॥12॥

## एतानि न स्याद्यन्तानि यस्य तस्याश्वमस्य च ।
## शेलुर्बिभीतको वेणुः पञ्चैते स्म ऋणानि च ॥१३॥

**गुण०** [१३.१][१३.२][१३.३]***यसूच् प्रयत्ने*** [**सिद्ध.धातु.१२२२**], ***तसू दसूच् उपक्षये*** [**सिद्ध.धातु.१२२४-२५**], पञ्चमी-हि, ***दिवादेः श्यः*** [**सिद्धहेम.३।४।७२**] इति श्ये, ***अतः प्रत्ययाल्लुक्*** [**सिद्धहेम.४।२।८५**] इति हेर्लोपे, **यस्य**, **तस्य**, **दस्य** इति सिद्धम् । ***जसूच् मोक्षणे*** [**सिद्ध.धातु.१२२३**] [1]इत्यस्य [१३.४]**जस्य** इति सिद्धम् । शेषं पूर्ववत् ।

[१३.५]**अश्वम्** इति, ***ट्वोश्वि गतिवृद्ध्योः*** [**सिद्ध.**

1 मोक्षणे, असूच् क्षेपणे [सिद्ध. धातु. १२२१] इति अस्य, यस्य इति सिद्धम् । शेषं इति अ.२ पा.२ ।

**धातु**.९९७] [1]इत्यस्माद् अद्यतनी-अम्, ***ऋदिच्छ्वि***[2] [**सिद्धहेम.३।४।६५**] इत्यादिना *[3]ऽङि, ***श्वयत्यसू***[4] [**सिद्धहेम.४।३।१०३**] इत्यादिना* श्वादेशे, ***लुगस्यादेत्यपदे*** [**सिद्धहेम.२।१।११३**] इत्यलोपे, अडागमे च **अश्वम्** इति सिद्धम् ।

[१३.६] →[5]**अस्य** इति, ***असूच् क्षेपणे*** [**सिद्ध. धातु.१२२१**] शेषं यस्येतिवत्← । शेलुः [6]श्लेष्मातकः, बिभीतकोऽक्षः, वेणुर्वंशः, स्याद्यन्ताः सिद्धाः, त्याद्यन्ताः तु कथम् ? इत्युच्यते–

[१३.७]***पल फल शल गतौ*** [**सिद्ध.धातु**.९८२-९८४] परोक्षा-उस्, ***अनादेशादे***[7] [**सिद्धहेम.४।१।२४**] इत्यादिनोपान्त्याकारस्य एत्वे, सस्य रुत्वे, विसर्गे च **शेलु**रिति सिद्धम् ।

[१३.८]**बिभीतक** इति, ***ञिभींक् भये*** [**सिद्ध.धातु.११३२**], वर्तमाना-तस्, ***हवः शिति*** [**सिद्धहेम.४।१।१२**] इति द्वित्वम्, ***ह्रस्वः*** [**सिद्धहेम.४।१।३९**] इति पूर्वस्य ह्रस्वः, ***द्वितीयतुर्ययोः***[8]

---

1 त्यस्य अ.१, अ.२ ।

2 ऋदिच्छ्विस्तम्भूम्रुचूम्लुचुग्रुचूग्लुचूग्लुञ्चूज्रो वा ।

3 *...*एतच्चिह्नान्तर्गतः पाठः अ.१ मध्ये नास्ति ।

4 श्वयत्यसूवचपतः श्वास्थवोचपप्तम् ।

5 →...←एतच्चिह्नान्तर्गतः पाठः अ.२ मध्ये नास्ति ।

6 ष्मान्तकः अ.२, पा.१ विना सर्वप्रतेषु ।

7 अनादेशादेरेकव्यञ्जनमध्येऽतः ।

8 द्वितीयतुर्ययोः पूर्वौ ।

[**सिद्धहेम.४।१।४२**] इत्यादिना भस्य बः, कुत्सितत्वविवक्षायां ***त्यादिसर्वादेः***[1] [**सिद्धहेम.७।३।२९**] इत्यादिनान्त्यस्वरात् [2]पूर्वोऽक्, सस्य रुत्वे, विसर्गे च **बिभीतक** इति सिद्धम् ।

[१३.९]***अण रण*** [**सिद्ध.धातु.२५९-२६०**] इत्यादौ ***वण शब्दे*** [**सिद्ध.धातु.२६१**], शेषं **शेलु**रितिवत् । *[3]**वेणु**रिति सिद्धम्* ।

[१३.१०]**पञ्चेते** इति, ***पचुङ् व्यक्तीकरणे*** [**सिद्ध.धातु.६५७**], ***उदितः स्वरान्नोऽन्तः*** [**सिद्धहेम.४।४।९८**] इत्यन्त्यस्वरात्परो नकारः, वर्तमाना-आते, शव्, ***आतामाते***[4] [**सिद्धहेम.४।२।१२१**] इत्यादिनाकारस्य इकारः, ***अवर्णस्य***[5] [**सिद्धहेम.१।२।६**] इत्यादिना एकारः, **पञ्चेते** इति सिद्धम् ।

[१३.११]**स्म** इति, ***असक् भुवि*** [**सिद्ध.धातु.११०२**], वर्त्तमाना-मस्, ***श्नास्त्योर्लुक्*** [**सिद्धहेम.४।२।९०**] इत्यकारलोपे, सस्य रुत्वे, विसर्गे च, **स्म** इति सिद्धम् ।

[१३.१२]→[6]**ऋणानि** इति, ***ॠश् गतौ*** [**सिद्ध.धातु.१५३९**], इत्यस्य पञ्चम्या आनिवि, ***क्र्यादेः*** [**सिद्धहेम.३।४।७९**] इति श्ना, ***प्वादेर्ह्रस्वः*** [**सिद्धहेम.४।२।१०५**]

---

1 त्यादिसर्वादेः स्वरेष्वन्त्यात्पूर्वोऽक् ।

2 कः अ.३, अ.१, सु.१ ।

3 *...*एतच्चिह्नान्तर्गतः पाठः अ.२ मध्ये नास्ति ।

4 आतामाते-आथामाथे आदिः ।

5 अवर्णस्येवर्णादिनैदोदरल् ।

6 →...←एतच्चिह्नान्तर्गतः पाठः अ.२ मध्ये नास्ति ।

इति ह्रस्वः, [1]समानदीर्घत्वे, णत्वे च **ऋणानि** इति सिद्धम् ।←

चः समुच्चये । तेन ***असूच् क्षेपणे*** [**सिद्ध.धातु.१२२१**], ***यसूच् प्रयत्ने*** [**सिद्ध.धातु.१२२२**], ***तसू दसूच् उपक्षये*** [**सिद्ध.धातु.१२२४-२५**], ***कस गतौ*** [**सिद्ध.धातु.९८७**], आशीः क्यात् [१३.१३]**अस्याः**, [१३.१४]**यस्याः**, [१३.१५]**तस्याः**, [१३.१६] **दस्याः**, [१३.१७]**कस्या** इति ॥१३॥

**जिन०** [13.1] [13.2] [13.3] यस्यतेस्तस्यतेश्च हौ **यस्य, तस्य, दस्य** इति सिद्धिः ।। [13.4] **अश्वमि**ति श्वयतेरमि । [13.5] **अस्ये**ति अस्यतेः हौ रुपम् । [13.6] **शेलु**रिति *“पल फल शल गतौ”* [सिद्ध.धातु. 982-984] इत्यस्य परोक्षा - उसि । [13.7] **बिभीतक** इति *“ञिभीं भये”* [सिद्ध.धातु. 1132] वर्तमाना-तस्, *“हवःशिति”* [सिद्धहेम. 4।1।12] इति द्वित्वं, कुत्सितत्वविवक्षायां *“त्यादिसर्वादेः०”* [सिद्धहेम. 7।3।29] इत्यादिनाऽन्त्यस्वरात् पूर्वोऽक् । [13.8] **वेणु**रिति *“अण रण”* [सिद्ध.धातु. 259-260] इत्यादौ *“वण शब्दे”* [सिद्ध.धातु. 261] उस्यादि शेषं शेलुवत् । [13.9] **पञ्चेते** इति *“पचुङ् व्यक्तीकरणे”* [सिद्ध.धातु. 657] इत्यस्य पचनं पञ्चस्तमिते = प्राप्ते **पञ्चेते** इति, त्याद्यन्तं तु तस्यैव धातोर्वर्तमाना-आते । [13.10] **स्म**

1 रषृवर्णा. [सिद्धहेम. २।३।६३] इति श्नाप्रत्ययस्य णत्वे, समानदीर्घत्वे, ऋणानि इति सिद्धमधात् अ.१ ।

इति स्मशब्दादव्ययात् सत्त्वे स्यादौ स्याद्यन्तत्वं, त्याद्यन्तत्वं त्वस्तेर्वर्तमाना - मसि । [13.11] **ऋणानी**ति *"ऋंश् गतौ"* [सिद्ध. धातु. 1539] इत्यस्य आनिवि ।

चः समुच्चये । तेन अस्यत्यादीनाम् आशीः - क्यासि [13.12] **अस्याः**, [13.13] **यस्याः** [13.14] **कस्याः** ।।13।।

## एकस्य कस्य धातोः स्यात्त्यादौ रूपचतुष्टयम् ।
## पर्वाणि पर्वतं पर्व पर्वतोऽपूर्वमेव च ॥१४॥

**गुण०** [१४.१]**पर्वाणि** इति, ***पूर्व पर्व मर्व पूरणे*** [**सिद्ध. धातु.४५४-४५६**], पञ्चम्या आनिवि, शवि, समानदीर्घत्वे, णत्वे, **पर्वाणि** इति सिद्धम् ।

[१४.२]**पर्वतम्** इति, ***पर्वधातुः*** [**सिद्ध.धातु.४५५**], पञ्चमी-तम्, शव्, **पर्वतम्** इति सिद्धम् ।

[१४.३]**पर्व** इति, ***पर्वधातुः*** [**सिद्ध.धातु.४५५**], पञ्चम्या हौ, शवि, ***अतः प्रत्ययाल्लुक्*** [**सिद्धहेम.४।२।८५**] इति हेर्लोपे, **पर्व** इति सिद्धम् ।

[१४.४]तसि तु **पर्वत** इति [1]सिद्धम् ।

[१४.५]***पूर्वधातोः*** [**सिद्ध.धातु.४५४**] तु ह्यस्तनी-अम्वि,

1 सिद्धम् अ.२ विना नास्ति ।

***लुगस्यादेत्यपदे*** **[सिद्धहेम.२।१।११३]** इत्यलोपे, अडागमे च **अपूर्वम्** इति सिद्धम् ।

[1]*त्यादौ रूपचतुष्टयं सिद्धम्* । चः समुच्चये ।

[१४.६]तेन ***जल घात्ये*** **[सिद्ध.धातु.९०३]**, पञ्चमी-आनिवि, शवि, समानदीर्घत्वे च **जलानि** इति सिद्धम् ।

[१४.७][१४.८][१४.९]रूपत्रयं तु ***वांक् गतिगन्धनयोः*** **[सिद्ध.धातु.१०६३]** इत्यस्य क्रमेण वर्तमानायाः तसि, पञ्चम्या द्विवचने तमि, बहुवचने [2]त, **वातः**, **वातम्**, **वात** इति सिद्धम् ।

[१४.१०]***प्रांक्*** [3]***पूरणे*** **[सिद्ध.धातु.१०७२]** इत्यस्य वर्त्तमाना-तसि, **प्रातः** इति सिद्धम् ।

[१४.११]**श्याम** इति, ***शोंच् तक्षणे*** **[सिद्ध.धातु.११४७]** वर्त्तमाना-मसि, श्ये, ***ओतः श्ये*** **[सिद्धहेम.४।२।१०३]** इत्योकारलोपे, ***मव्यस्याः*** **[सिद्धहेम.४।२।११३]** इत्यकारस्याकारे सिद्धं **श्याम** इति ।

[१४.१२]**अध्याय** इति, ***ध्यैं चिन्तायाम्*** **[सिद्ध.धातु.२९]**, ह्यस्तन्याः सिवि, शवि, आयादेशे, अडागमे च सिद्धम् **अध्याय** इति ।

[१४.१३]***ऊतृदृपी हिंसानादरयोः*** **[सिद्ध.धातु.१४८१]**,

---

1 *...*एतच्चिह्नान्तर्गतः पाठः अ.२, पा.१ मध्ये नास्ति ।

2 ते अ.३, सु.१ ।

3 रक्षणे अ.२ ।

ह्यस्तनी-सिव्, ***रुधां स्वराच्छ्नो नलुक् च*** [**सिद्धहेम.३।४।८२**] इति नकारागमः, ***सेः स्द्धां च रुर्वा*** [**सिद्धहेम.४।३।७९**] इति सिव् लुक्, दस्य रुत्वम्, रेफस्य विसर्गादेशः, णत्वम्, **अतृण** इति सिद्धम्।

[१४.१४][१४.१५]चन्द्र इवाचरति, आदित्य इवाचरति, ***कर्तुः क्विप्***[1] [**सिद्धहेम.३।४।२५**] इति क्विप्, तस्य लोपे, ***क्रियार्थो धातुः*** [**सिद्धहेम.३।३।३**] इति धातुत्वे, पञ्चम्या हौ, शवि, ***लुगस्यादेत्यपदे*** [**सिद्धहेम.२।१।११३**] इत्यकारलोपे, ***अतः प्रत्ययाल्लुक्*** [**सिद्धहेम.४।२।८५**] इति हेर्लुकि, **चन्द्र**, **आदित्य** इति [2]प्रयोगद्वयं सिद्धम् ।

[१४.१६]तथा ***णल गन्धे*** [**सिद्ध.धातु.९७८**], ***पाठे धात्वादेर्णो नः*** [**सिद्धहेम.२।३।९७**] इति णस्य नः, ह्यस्तनी-सिवि, शवि, अडागमे, सस्य रुत्वे, विसर्गादेशे च **अनल** इति सिद्धम् ।

[१४.१७]***क्षर सञ्चलने*** [**सिद्ध.धातु.९७१**] ह्यस्तनी-अम्व्, शवि, पूर्ववद् **अक्षरम्** इति सिद्धम् ॥१४॥

**जिन०** स्पष्टोऽयंश्लोकः । नवरं चः समुच्चये तेन [14.1] *"जल घात्ये"* [सिद्ध. धातु. 973] इत्यस्य आनिवि **जलानि** इति सिद्धम् । तथा [14.2] **वातं** [14.3] **वातः** [14.4] **[वात]** पञ्चम्याः [तम्], तस्, [त] इति रुपत्रयं त्याद्यन्तं स्पष्टं च । [14.5] **प्रातः** इति च त्याद्यन्तम् । [14.6] **श्याम**

1 कर्तुः क्विप् गल्भक्लीबहोडात्तु ङित् ।

2 गयुग्मं अ.२ ।

इत्यपि त्याद्यन्तं श्यतेर्मसि । [14.7] एवं **रामः**, [14.8] **यामः** इत्यादयो ज्ञेयाः ।

अन्यच्च [14.9] **अध्याय** इत्यपि त्याद्यन्तः ध्यायतेः सिवि । [14.10] **अतृण** इति च *"ऊतृदृपी हिंसानादरयोः"* [सिद्ध. धातु. 1481] सिवि, श्ने *"सेः स्द्धां च रूर्वा"* [सिद्ध.हेम. 4।3।79] इति सिच् लुकि, दस्य रुत्वे च सिद्धम् । [14.11] तथा **चन्द्र**, [14.12] **आदित्य** इत्यपि पदेनामन्त्र्यस्यन्ते किन्तु त्याद्यन्ते आचार क्विपि नामधातुत्वे हौ । [14.13] तथा **अनलः** इति त्याद्यन्तं *"णल गन्धे"* [सिद्ध.धातु. 978] इत्य[स्य] सिवि । [14.14] तथा **अक्षरमि**त्यपि त्याद्यन्तं *"क्षर संचलने"* [सिद्ध. धातु. 971] इत्यस्य अम्वि ।।14।।

**अशोकोऽनौस्तथा वातादश्रीणामरुणोऽवनम् ।**
**वनानि स्वोऽखिलं यानि शुभानि चरणानि च ॥१५॥**

**गुण०** [१५.१]**अशोक** इत्यशोकवृक्षः, अत्र ***शुक गतौ*** [**सिद्ध.धातु**.**५३**] ह्यस्तन्याः सिवि, शवि, ***लघोरुपान्त्यस्य*** [**सिद्धहेम.४।३।४**] इति गुणे, अडागमे, सस्य रुत्वे, विसर्गादेशे च **अशोक** इति सिद्धम् ।

[१५.२]**अनौः** इति, न नौरनौ इति प्रथमान्तम्, विपर्यये तु ***णुक् स्तुतौ*** [**सिद्ध.धातु.१०८१**] इत्यस्य ***पाठे धात्वादेर्णो नः*** [**सिद्धहेम.२।३।९७**] इति णस्य ने, ह्यस्तन्याः सिवि, ***उत और्विति***

***व्यञ्जनेऽद्वेः* [सिद्धहेम.४।३।५९]** इत्युकारस्य औकारे, [1]अडागमे, सस्य रुत्वे, विसर्गे च **अनौः** इति सिद्धम् ।

[१५.३]**वाताद्** इति ङस्यन्तं [2]सुगमम्, अत्र ***वांक् गतिगन्धनयोः*** [**सिद्ध.धातु.१०६३**] इत्यस्य पञ्चम्याः तुव् हिर्वा, ***आशिषि तुह्योस्तातङ्*** [**सिद्धहेम.४।२।११९**] इति तातङादेशः, **वाताद्** इति सिद्धम् ।

[१५.४]**अश्रीणाम्** इति, न विद्यते श्रीर्येषाम् इति षष्ठ्यन्तं सुगमम्, अपरं तु ***श्रींग्श् पाके*** [**सिद्ध.धातु.१५११**], ह्यस्तनी-अम्व्, ***क्र्यादेः*** [**सिद्धहेम.३।४।७९**] इति श्ना, समानदीर्घत्वम्, अडागमः, णत्वम्, ततः सिद्धम् **अश्रीणाम्** इति ।

[१५.५]**अरुण** इति प्रथमान्तम्, अन्यत्र तु ***रूधृंपी आवरणे*** [**सिद्ध.धातु.१४७३**] इत्यस्य ह्यस्तन्याः सिव्, ***रुधां स्वराच्श्नो नलुक् च*** [**सिद्धहेम.३।४।८२**] इति श्नप्रत्ययम्, णत्वम्, ***सेः स्द्धां च रुर्वा*** [**सिद्धहेम.४।३।७९**] इति धस्य रुत्वम्, सिवो लोपः, रेफस्य विसर्गादिशः, अडागमे**ऽरुण** इति सिद्धम् ।

[१५.६]**अवनम्** इति, न *[3]विद्यते वनम् इति* अवतेर्वा, ***रम्यादिभ्यः कर्तरि*** [**सिद्धहेम.५।३।१२६**] इत्यनटि प्रथमान्तम्, त्याद्यन्तं तु ***वन षण सम्भक्तौ*** [**सिद्ध.धातु.३२९-३३०**] इत्यस्य

1 नामिनो गुणो क्ङिति[सिद्धहेम. ४।३।१] इति गुणे इत्यधिकं अ.३, पा.१ ।
2 न्तं तु सुगममेव पा.१ ।
3 *...*एतच्चिह्नान्तर्गतः पाठः अ.२ मध्ये नास्ति ।

ह्यस्तन्या अम्वि, शवि, ***लुगस्यादेत्यपदे*** [**सिद्धहेम.२।१।११३**] इत्यकारलुकि, अडागमे च **अवनम्** इति सिद्धम् ।

[१५.७]**वनानि** इत्यत्रापि ***वनधातुः*** [**सिद्ध.धातु.३२९**], पञ्चमी-आनिवि, समानदीर्घत्वम्, **वनानि** इति सिद्धम् ।

[१५.८]**स्व** [1]इत्यव्ययं क्रिया च ***असक् भुवि*** [**सिद्ध.धातु.११०२**] इत्यस्य वर्तमाना-वस्, ***श्नास्त्योर्लुक्*** [**सिद्धहेम.४।२।९०**] इत्यकारलोपे सिद्धं **स्व** इति ।

[१५.९]**अखिलम्** इति [2]खिलम् इवाचरति, ***कर्तुः क्विप्***[3] [**सिद्धहेम.३।४।२५**] [इति क्विप्], तस्य लुक्, ह्यस्तनी-अम्वि, शवि, ***लुगस्यादेत्यपदे*** [**सिद्धहेम.२।१।११३**] इत्यकारलोपः, अडागमे, **अखिलम्** इति सिद्धम् ।

[१५.१०]**यानि** इति, ***यांक् प्रापणे*** [**सिद्ध.धातु.१०६२**] इत्यस्य पञ्चम्या- आनिवि, शवि, समानदीर्घत्वे च सिद्धं **यानि** इति ।

[१५.११]**शुभानि** इति, ***शुभ शुम्भत् शोभार्थे*** [**सिद्ध.धातु.१३८७-८८**] इत्यस्य पञ्चम्या आनिवि, [4]*→***तुदादेः***

---

1 स्वः इत्यस्यन्तं वर्त सु.१ विना सर्वप्रतेषु ।

2 इति समस्तपर्यायः, वेलु चेलृ [सिद्ध.धातु. ४४३-४४४] इत्यादि चलने खलतीत्यस्य विपृषोदय इत्यकारलोपः, खिलमि सु.१ ।

3 कर्तुः क्विप्गल्भक्लीबहोडात्तु ङित् ।

4 *...*एतच्चिह्नान्तर्गतः पाठः अ.३, विना नास्ति । →...←एतच्चिह्नान्तर्गतः पाठः अ.१ विना नास्ति ।

*शः* [**सिद्धहेम.३।४।८१**] इति* शे, ***मुचादितृफदृफ***[1] [**सिद्धहेम.४।४।९९**] इति नागमे,← ***नो व्यञ्जनस्यानुदितः*** [**सिद्धहेम.४।२।४५**] इति नलोपे, समानदीर्घत्वे च **शुभानि** इति सिद्धम् ।

[१५.१२]**रणानि** इति, ***अण रण*** [**सिद्ध.धातु**.२५९-२६०] इत्यादिदण्डकधातुः, पञ्चम्या आनिवि, [2]शवि, समानदीर्घत्वे च **रणानि** इति सिद्धम् ॥१५॥

**जिन०** [15.1] *"शुक गतौ"* [सिद्ध.धातु. 53] इत्यस्य सिवि **अशोक** इति रुपम् । [15.2] **अनौरि**ति नौतेः सिवि । [15.3] **वातादि**ति वातेस्तातङि । [15.4] **अश्रीणामि**ति *"श्रींग्श् पाके"* [सिद्ध.धातु. 1511] इत्यस्य अम्वि । [15.5] **अरुण** इति रुध रुधीश्वर (*"रुधृंपी आवरणे"?*) [सिद्ध. धातु. 1473] सिवि । [15.6] **अवनमि**ति *"वन षण संभक्तौ"* [सिद्ध.धातु. 329-330] इत्यस्य अम्वि । [15.7] **वनानी**ति वनतेरानिवि । [15.8] **स्व** इति अस्तेर्वसि । [15.9] **अखिलमि**ति खिलशब्दादाचारक्विबन्तादमि(म्वि) [15.10] **यानी**ति यातेरानिवि । [15.11] **शुभानी**ति *"शुभ शुंभत् शोभार्थे"* [सिद्ध.धातु. 1387-88] इत्यस्य आनिवि । [15.12] **रणानी**ति रणतेरानिवि ।।15।।

1 मुचादितृफदृफगुफशुभोभः शे ।

2 आनिवादि पूर्ववत् अ.१ ।

एते जसन्तसदृशाः—

**सास्नाया अकृशोऽताता अमर्मा अवटोऽनृणाम् ।**
**वेष रेफ रवेऽपेपेरदोधूर्तानिलः कुतः ॥१६॥**

**गुण०** [१६.१]**सास्नाया** इत्यनडुहो गलकम्बलपर्यायः, षष्ठ्यन्तः, क्रिया तु ***ष्णांक् शौचे*** [**सिद्ध.धातु.१०६४**], इत्यस्य ***षः सोऽष्ट्यै***[1] [**सिद्धहेम.२।३।९८**] इत्यादिना षस्य सः, ***निमित्ताभावे नैमित्तिकस्याप्यभावः*** [**न्या.सं.१।२९**] इति णस्य नत्वे, अत्यर्थं स्नातीति यङि, तस्य लोपे, ***सन्यङश्च*** [**सिद्धहेम.४।१।३**] इति द्वित्वे, अनादिव्यञ्जनलुकि, ***ह्रस्वः*** [**सिद्धहेम.४।१।३९**] इति ह्रस्वत्वे, ***आगुणावन्यादेः*** [**सिद्धहेम.४।१।४८**] इति पूर्वस्य दीर्घत्वे, सप्तम्या यासि, **सास्नाया** इति सिद्धम् ।

[१६.२]**अकृश** इति, नञा समासे [2]सिध्यति । क्रिया तु ***कृशच् तनुत्वे*** [**सिद्ध.धातु.१२०७**], अद्यतनी-सिः, ***लृदिद्द्युतादि***[3] [**सिद्धहेम.३।४।६४**] इत्यादिनाङि, अडागमे च **अकृश** इति सिद्धम् ।

[१६.३]**अताता** इति, न विद्यते तातो येषां तेऽतातोः, क्रिया तु ***तर्द हिंसायाम्*** [**सिद्ध.धातु.३०५**] इत्यस्य यङि, तस्य लोपे, द्वित्वे, अनादिव्यञ्जनलोपे, ***आगुणावन्यादेः*** [**सिद्धहेम.४।१।४८**] इत्यस्याकारे च ह्यस्तनी-सिवि, ***सेः स्द्धां***

1 षः सोऽष्ट्यैष्ठिवष्वष्कः ।

2 सिद्धिमेति अ.२ ।

3 लृदिद्द्युतादिपुष्यादेः परस्मै ।

***च रुर्वा*** [**सिद्धहेम.४।३।७९**] इति दस्य रुत्वे, सिव् लोपे, ***रो रे लुग्***[1] [**सिद्धहेम.१।३।४१**] इत्यादिना रेफस्य लोपे, पूर्वस्य दीर्घत्वे चाडागमेऽ**ताता** इति सिद्धम् ।

[१६.४]**अमर्मा** इति, न विद्यते मर्म यासाम् इति विग्रहे ***ताभ्यां वाप्डित्*** [**सिद्धहेम.२।४।१५**] इति डाप्, प्रथमाबहुवचने [2]रूपम्, क्रिया तु ***मृदश् क्षोदे*** [**सिद्ध.धातु.१५५०**] इत्यस्य शेषं पूर्ववत्, केवलं द्वित्वे कृते ***रि रौ च लुपि*** [**सिद्धहेम.४।१।५६**] इति रूरागमे, मूलधातोः तूपान्त्यस्य गुणे सिद्धम् **अमर्मा** इति ।

[१६.५]**अवट** इति न वटोऽवटो = गर्तः। क्रिया तु ***वट वेष्टने*** [**सिद्ध.धातु.१७६**] इत्यस्य ह्यस्तनी-सिवि, [3]*→शवि, अडागमे च← सिद्धम् **अवट** इति* ।

[१६.६]**अनृणाम्** इति, न नरोऽनर इत्यादि। क्रिया तु ***नॄश नये*** [**सिद्ध.धातु.१५३७**], ह्यस्तनी-अम्व्, ***क्र्यादेः*** [**सिद्धहेम.३।४।७९**] [इति] श्ना, अडागमः, ***प्वादेर्ह्रस्वः*** [**सिद्धहेम.४।२।१०५**] इति ह्रस्वः, **अनृणाम्** इति सिद्धम् ।

[१६.७][4]****विषू सेच(सह)ने*** [**सिद्ध.धातु.५२३**],

1 रो रे लुग् दीर्घश्चादिदुतः ।

2 रूपं सिद्धम् अ.२ ।

3 *...*एतच्चिह्नान्तर्गतः पाठः अ.३, पा.२ अ.१, सु.१ मध्ये नास्ति। →...← एतच्चिह्नान्तर्गतः पाठः पा.१ मध्यैव ।

4 *...*एतच्चिह्नान्तर्गतः पाठः अ.२ मध्ये नास्ति ।

हौ, गुणे, वेष इत्यसिधत् । वषतेर्हिंसार्थस्य वा, परोक्षा-अ, उपान्त्यस्याकारस्येकारः, अनेनापि प्रकारेण **वेष** इति सिद्धम्* ।

[१६.८]***वर्फ रफ*** [**सिद्ध.धातु.३५१-३५२**] इति दण्डकधातुः, शेषं पूर्ववत् ।

[१६.९]**रवे** इति, रविशब्दाद् आमन्त्र्ये सौ, रवशब्दो वा सप्तम्यन्तः । क्रिया तु ***रूङ्*[1] *रोषणे च*** [**सिद्ध.धातु**.५९९] इत्यस्य वर्तमाना-ए, शवि, ***नामिनो गुणोऽक्ङिति*** [**सिद्धहेम.४।३।१**] इति गुणे, अवादेशे, ***लुगस्यादेत्यपदे*** [**सिद्धहेम.२।१।११३**] इत्यलोपे, **रवे** इति सिद्धम् ।

[१६.१०]**अपेपे** इति, ***पिसृ पेसृ वेसृ गतौ*** [**सिद्ध.धातु**.५४६-५४८] इत्यस्य यङि, तस्य लोपे, द्वित्वे, अनादिव्यञ्जनलोपे, ह्यस्तन्याः सिवि, उपान्त्यगुणे, अडागमे, ***सेः स्द्धां च रुर्वा*** [**सिद्धहेम.४।३।७९**] इति सिवो लुकि, सस्य रुत्वे, रेफस्य विसर्गे च **अपेपे** इति सिद्धम् ।

[१६.११]**अदोधूर्त** इति, ***उर्वै तुर्वै*** [**सिद्ध.धातु**.४७०-४७१] इत्यादौ ***धूर्वै हिंसायाम्*** [**सिद्ध.धातु**.४७४], यङि, तस्य लोपे, द्वित्वे, अनादिव्यञ्जनलोपे, ***द्वितीयतुर्ययोः पूर्वौ*** [**सिद्धहेम.४।१।४२**] [इति] धस्य दः, पूर्वस्य गुणः ह्यस्तनी-त,

---

1 धातुपाठे तु रेषणे इति ।

***रो रे लुग्***[1] [**सिद्धहेम.१।३।४१**] इति रलोपे, ***भ्वादेर्नामिनः***[2] [**सिद्धहेम.२।१।६३**] इत्यादिना दीर्घत्वे, अडागमे, सिद्धम् **अदोधूर्त** इति ।

[१६.१२]***णिलत् गहने*** [**सिद्ध.धातु.१४१०**] ***पाठे धात्वादेर्णो नः*** [**सिद्धहेम.२।३।९७**] *[3]इति णस्य नः*, ह्यस्तन्याः सिवि, ***तुदादेः शः*** [**सिद्धहेम.३।४।८१**] इति शे, अडागमे, सस्य रुत्वे, विसर्गे च **अनिल** इति सिद्धम् ।

[१६.१३]**कुत** इति, किमः पञ्चम्यन्तात् तसि, ***इतोऽतः कुतः*** [**सिद्धहेम.७।२।९०**] इति कृते तद्धितान्तम्, →[4]क्रिया तु ***टुक्षु रु कुंक् शब्दे*** [**सिद्ध.धातु.१०८४-८६**], इत्यस्य वर्तमाना-तसि, सस्य रुत्वे, विसर्गे च← **कुत** इति सिद्धम् ॥१६॥

**जिन०** [16.1] स्नातेर्यङ्लुबन्तस्य यासि **सास्नायाः** इति सिद्धम्। [16.2] **अकृश** इति *"कृशच् तनुत्वे"* [सिद्ध. धातु. 1207] इत्यस्य पुष्यादेरद्यतनी-सौ । [16.3] **अताता** इति *"तर्दि हिंसायाम्"* [सिद्ध.धातु. 305] इत्यस्य यङ्लुपि द्वित्वादौ कृते सिवि, *"से स्द्धां च रुर्वा"* [सिद्ध.हेम. 4।3।79] इति सिव् लोपे दस्य च रुत्वे, *"रो रे लुग्०"*

1 रो रे लुग् दीर्घश्चादिदुतः ।

2 भ्वादेर्नामिनो दीर्घोर्वोर्व्यञ्जने ।

3 *...*एतच्चिह्नान्तर्गतः पाठः पा.१, अ.२ विना नास्ति ।

4 →...←एतच्चिह्नान्तर्गतः पाठः अ.२ मध्ये नास्ति ।

[सिद्ध.हेम. 1।3।41] इति कृते सिद्धम् । [16.4] **अर्ममा** इति न विद्यते मर्म यासां ते अमर्माः, *"ताभ्यां वाप्डित्"* [सिद्ध.हेम. 2।4।15] इति पूर्वपक्षः, समाधिपक्षे *"मृदश् क्षोदे"* [सिद्ध.धातु. 1550] इत्यस्य शेषं पूर्ववत्, केवलं द्वित्वे कृते *"रि रौ च लुपि"* [सिद्ध. हेम. 4।1।56] इति रागमे मूलधातोस्तूपान्त्यगुणे सिद्धम् । [16.5] **अवट** इति *"वट वेष्टने"* [सिद्ध धातु. 176] इत्यस्य सिवि सिद्धिः । [16.6] **अनृणामि**ति *"नृश नये"* [सिद्ध.धातु. 1537] इत्यस्य अम्वि । [16.7.1] **वेषे**ति *"विषू सेचने"* [सिद्ध. धातु. 523] इत्यस्य हौ, [16.7.2] वषतेर्वा हिंसार्थस्य परोक्षा-अप्रत्यये । [16.8] *मफ वर्फ रफ* [सिद्ध.धातु. 350-352] इति दण्डकधातोः परोक्षा-अ । [16.9] **रवे** इति पूर्वपक्षे रविरामन्त्र्यान्तः, रवः सप्तम्यन्तो वा । उत्तरपक्षे च *"रूङ् रोषणे च"* [सिद्ध. धातु. 599] वर्तमाना - ए । [16.10] **अपेपेरि**ति पिंत पेस *(पिसृ पेसृ वेसृ गतौ)* [सिद्ध. धातु. 546-548] यङ्लुपि, द्वित्वादौ, सिवि, *"सेः स्द्धां च रुर्वा"* [सिद्ध.हेम. 4।3।79] इति सिव् लोपे, सस्य रुत्वे च सिद्धम् । [16.11] **अदोधूर्त** इति उपान्त्यगुणे धुर्वतेर्हिंसार्थस्य, यङ्लुपि द्वित्वादौ, ह्यस्तनी-त, *"राल्लुग्"* [सिद्ध. हेम. 4।1।110] इति वलोपे, *"भ्वादेर्नामिनो०"* [सिद्ध. हेम. 2।1।63] इति दीर्घत्वमडागमे च सिद्धम् ।

[16.12] **अनिल** इति *"णिलत् गहने"* [सिद्ध. धातु. 1410] इत्यस्य सिवि । [16.13] **कुतः** इति कौतेस्तसि ।।16।।

**अरये नभसे पयसे वयसे लोकेऽनसे गवे ।**
**वृक्षेऽह्योऽकवेऽयसे रेखे लेखे रजसि रेजेऽलिट् ॥१७॥**

**गुण०** [१७.१]आदौ रूपाणि चत्वारि चतुर्थ्यन्तानि, क्रियारूपाणि [1]तूच्यन्ते। ***अयि वयि*** [**सिद्ध.धातु**.७९०-७९१] इत्यादौ ***रयि गतौ*** [**सिद्ध.धातु**.७९६] इत्यस्य, ***णभि तुभि हिंसायाम्*** [**सिद्ध.धातु**.९४९-९५०], ***पाठे धात्वादेर्णो नः*** [**सिद्धहेम.२।३।९७**] [इति णस्य नः], ***अयि वयि पयि मयि नयि चयि रयि गतौ*** [**सिद्ध.धातु**.७९०-७९६] इत्यस्य वयिपय्योरनयोराद्यात्, ह्यस्तनी-इप्रत्यये, शवि, ***अवर्णस्येवर्णादिना***[2] [**सिद्धहेम.१।२।६**] इत्यादिनाकारस्येकारेण सह एकारेऽडागमे च **अरये** इति सिद्धम् ।

त्रिभ्यः तु वर्तमाना-से, शवि, [१७.२]**नभसे**, [१७.३]**पयसे**, [१७.४]**वयसे** इति सिद्धम् ।

[१७.५]*[3]लोके इति सप्तम्यन्तम्, ***लोकृङ् दर्शने*** [**सिद्ध.धातु**.६१२], वर्तमाना-ए, शवि, ***लुगस्यादेत्यपदे*** [**सिद्धहेम.२।१।११३**] इत्यलोपे, **लोके** इति सिद्धम्* ।

---

1 तदुच्यन्ते अ.१, पा.१ विना सर्वप्रतेषु ।

2 अवर्णस्येवर्णादिनैदोदरल् ।

3 *...*एतच्चिह्नान्तर्गतः पाठः अ.२ मध्ये नास्ति ।

एवम् अन्येऽपि स्वबुद्ध्या कल्प्याः । सूत्रकृता तु ग्रन्थगौरवभयान्नोक्ताः । ते त्वमी आत्मनेपदि(दी)नां धातूनां ज्ञेयाः ।

[१७.६]यथा ***कुडुङ् दाहे*** **[सिद्ध.धातु**.**६९०]**, ***उदितः स्वरान्नोन्तः*** **[सिद्धहेम.४।४।९८]** इति नागमे, ततो वर्तमाना-ए, शवि, ***लुगस्यादेत्यपदे*** **[सिद्धहेम.२।१।११३]** इत्यलोपे, **कुण्डे** इति सिद्धम् ।

एवं ***हुडुङ् पिडुङ् सङ्घाते*** **[सिद्ध.धातु**.**६८३-६८४]**, [१७.७]**हुण्डे**, [१७.८]**पिण्डे** । ***मुडुङ् उद्यमे(मज्जने)*** **[सिद्ध.धातु**.**६९४]** [१७.९]**मुण्डे** । ***तुडुङ् तोडने*** **[सिद्ध.धातु**.**६९५]** [१७.१०]**तुण्डे** । ***चडुङ् कोपे*** **[सिद्ध.धातु**.**६९७]** [१७.११]**चण्डे** । ***तडुङ् ताडने*** **[सिद्ध.धातु**.**६८६]** [१७.१२] **तण्डे** । ***खडुङ् मन्थे*** **[सिद्ध.धातु**.**६८८]** [१७.१३]**खण्डे** । शेषं [1]कुण्डेवत् । एते [2]सर्वे सप्तम्येकवचनप्रतिरूपकाः, प्रथमा-द्वितीयाद्विवचनैः [3]सदृशा वा ।

[१७.१४]***यांक् प्रापणे*** **[सिद्ध.धातु**.**१०६२]** इत्यस्य वर्तमाना-मसि, सस्य रुत्वे, विसर्गे च **याम** इति सिद्धम् । प्रहरवाची स्यन्तः ।

[१७.१५]***रांक्*** [4]***आदाने*** **[सिद्ध.धातु**.**१०६९]** इत्यस्य शेषं

---

1 कुण्डवत् पा.२, पा.१, अ.१ ।

2 सर्वे पा.२ विना नास्ति ।

3 ०नसदृशा वा अ.२ ।

4 दाने पा.१ धातुपाठेऽपि ।

पूर्ववत्, **राम** इति सिद्धम्। एवम् अन्येऽपि वाच्याः ।

[१७.१६]**अनसे** इति, [1]***णसि कौटिल्ये*** **[सिद्ध.धातु.८५१]** ***पाठे धात्वादेर्णो नः*** **[सिद्धहेम.२।३।९७]** इति णस्य नत्वे, शेषम् अरये इतिवत्, **अनसे** इति सिद्धम् । अथवा शकटपर्याये [2]अनः शब्दः चतुर्थ्यन्तसदृशी क्रिया ।

[१७.१७]**गवे** इति, ***उंङ् कुंङ् गुंङ् घुंङ् ङुंङ् शब्दे*** **[सिद्ध.धातु.५८९-५९३]**, वर्तमाना- ए, शवि, ***नामिनो गुणोऽक्ङिति*** **[सिद्धहेम.४।३।१]** इति गुणे, ***ओदौतोऽवाव्*** **[सिद्धहेम.१।२।२४]** इत्यवादेशे, ***लुगस्यादेत्यपदे*** **[सिद्धहेम.२।१।११३]** इत्यकारलोपे, **गवे** इति क्रिया चतुर्थ्यन्तगोशब्दसदृशी ।

[१७.१८]**वृक्षे** इति, ***वृक्षि वरणे*** **[सिद्ध.धातु.८७८]**, गवेवत् ।

[१७.१९]**अहयः** इति हयशब्दान्नञ् पूर्वात् प्रथमैकवचने, अहि शब्दाद्वा जसि। क्रिया तु ***हय हर्य क्लान्तौ च*** **[सिद्ध.धातु.३९७-३९८]**, ह्यस्तन्याः सिवि, शवि, अडागमे, सस्य रुत्वे, विसर्गे च **अहय** इति सिद्धम् ।

[१७.२०]**अकवे** इति [3]कविशब्दान्नञ्पूर्वाद् आमन्त्र्ये सौ, नञ्पूर्वात् कुशब्दाद्वा चतुर्थ्याम्। क्रिया तु **उंङ् कुंङ् [सिद्ध.**

---

1 णस् पा.२ णस सु.१ ।

2 ०र्यायो अनः पा.२, अ.२, अ.१ ।

3 नञ्पूर्वात् इति अ.२ विना नास्ति ।

**धातु**.**५८९-५९०**] दण्डकधातुः, शेषम् **अनसे** इतिवत् । गुणकृतः तु विशेषः ।

[१७.२१]**अयसे** इति, अयो = लोहं चतुर्थ्येकवचनान्तम्। क्रिया तु ***अयि वयि*** [**सिद्ध.धातु**.**७९०-७९१**] दण्डकधातुः, शेषं वयसे इतिवत् । सिद्धम् **अयसे** इति ।

[१७.२२]**रेखे**, [१७.२३]**लेखे** इति द्विवचनान्तौ पङ्क्तिपर्यायौ । क्रिया तु ***उख*** [1]***णख वख*** [**सिद्ध.धातु**.**६३-६५**] इत्यादौ ***रखलखौ गत्यर्थौ*** [**सिद्ध.धातु**.**६८-६९**], परोक्षा-ए, ***अनादेशादेः***[2] [**सिद्धहेम.४।१।२४**] इत्यादिनोपान्त्यस्यास्य एत्वे, **रेखे लेखे** इति प्रयोगौ सिद्धौ ।

[१७.२४]**रजसि** इति सप्तम्येकवचनान्तम्। क्रिया तु ***रञ्जीं रागे*** [**सिद्ध.धातु**.**८९६**], वर्तमाना-सिवि, शवि, ***अकट्घिनोश्च रञ्जेः*** [**सिद्धहेम.४।२।५०**] इत्यनेनोपान्त्यनकारलोपे सिद्धं **रजसि** इति ।

[१७.२५]**रेजे**ऽलिट् इति लिट् इति परोक्षायाः सञ्ज्ञाऽन्येषां मते, रेजे इति परोक्षा न भवतीत्यर्थः । तथाहि, ***ऋजि गति***[3]***स्थानार्जनोर्जनेषु*** [**सिद्ध.धातु**.**६६४**] अमुं कश्चिद् व्यञ्जनादि पठति, तन्मतम् आश्रित्य प्रयोगः [4]साध्यते । वर्तमाना-ए, शवि,

---

1 उख नख सु.१ । उख नख णख धातुपाठे ।

2 अनादेशादेरेकव्यञ्जनमध्येऽतः ।

3 स्थानार्जनोर्जनेषु पा.१, अ.१, धातुपाठेऽपि ।

4 दर्श्यते अ.३ ।

***लघोरूपान्त्यस्य*** [**सिद्धहेम.४।३।४**] इति गुणे, ***लुगस्यादेत्यपदे*** [**सिद्धहेम.२।१।११३**] इत्यकारलोपे, **रेजे** इति सिद्धम् ।

[१७.२६]तथा [1]***ज्यांश् हानौ*** [**सिद्ध.धातु.१५२४**], नञ्पूर्वकः पञ्चम्या आनिवि, ***क्र्यादेः*** [**सिद्धहेम.३।४।७९**] इति श्ना, ***ज्याव्यधः क्ङिति*** [**सिद्धहेम.४।१।८१**] इति य्वृति, समानदीर्घत्वे, ***त्यादौ क्षेपे*** [**सिद्धहेम.३।२।१२६**] इति नकारस्याकारे च **अजिनानि** इति सिद्धम् । क्रिया चर्मपर्यायाऽजिनशब्दस्य जसन्तस्य शसन्तस्य वा सदृशीति ।

[१७.२७]प्राकृतसदृशी क्रिया *→[2]**आवे जाये** इति, ***उंङ् कुंङ् गुंङ् घुंङ् डुंङ् शब्दे*** [**सिद्ध.धातु.५८९-५९३**] इत्यस्य आङ्पूर्वस्य वर्तमाना-ए, शेषं गवे इतिवत् । ०[3]**आवे** इति सिद्धम्०।

[१७.२८]**जाये** इति, ***जनैचि प्रादुर्भावे*** [**सिद्ध.धातु.१२६५**] वर्तमाना-ए, श्ये*, ***ये नवा*** [**सिद्धहेम.४।२।६२**] इति नकारस्याकारे, ***लुगस्यादेत्यपदे*** [**सिद्धहेम.२।१।११३**] इत्यलोपे **जाये** इति सिद्धम्← । एवम् अन्येऽप्यनुसर्तव्याः ॥१७॥

**जिन० आदौ चतुष्कं चतुर्थ्यन्तसदृशम् । [17.1] रयतेर्गत्यर्थस्य ह्यस्तनी-इ अरये इति सिद्धम् । [17.2] नभसे इति *“नभि तुभि हिंसायाम्”* [सिद्ध.धातु. 949-950] इत्यस्य**

---

1 ज्यांश पा.२ विना सर्वप्रतेषु ।

2 *...*एतच्चिह्नान्तर्गतः पाठः पा.१ मध्ये नास्ति । →...←एतच्चिह्नान्तर्गतः पाठः अ.१ मध्ये नास्ति ।

3 ०...०एतच्चिह्नान्तर्गतः पाठः अ.२ मध्ये नास्ति ।

वर्तमाना-से । [17.3] **पयसे** इति [17.4] **वयसे** इति च *"अयि वयि"* [सिद्ध.धातु. 990-991] इति दण्डकधातौ पयिवय्योर्वर्त्तमाना-से । [17.5] **लोके** इति *"लोकृङ् दर्शने"* [सिद्ध.धातु. 612] वर्तमाना-ए । उपलक्षणत्वात् [17.6] **कुण्डे,** [17.7] **पिण्डे,** [17.8] **मुण्डे,** [17.9] **तुण्डे,** [17.10] **चण्डे,** [17.11] **खण्डे** इत्यादयोऽपि स्याद्यन्तप्रतिरूपका ज्ञेयाः । [17.12] **अनस** इति *"णस कौटिल्ये"* [सिद्ध.धातु. 851] ह्यस्तनी-इ । [17.13] **गवे** इति गवतेः शब्दार्थेऽस्य वर्तमाना-ए । [17.14] **वृक्षे** इति *"वृक्षि वरणे"* [सिद्ध.धातु. 878] वर्तमाना-ए । [17.15] **अहय** इति अहिशब्दाज्जसि प्रश्नपक्षे, उत्तरपक्षे च *"हय हर्य क्लान्तौ च"* [सिद्ध.धातु. 397-398] इत्य [स्य सि]वि । [17.16] **अकवे** इति नास्ति कुर्यस्यासौ अकुस्तस्मै अकवे नञ्पूर्वः । कविशब्दा[न्नञ्पूर्वाद्] वाऽऽमन्त्र्ये, क्रिया तु कुङ्धातोर्ह्यस्तन्याम् इ । [17.17] **अयसे** इति अयो = लोहं तस्मै अयसे, क्रिया तु अयतेर्वर्तमाना-से । [17.18] **रेखे** [17.19] **लेखे** इति द्विवचनान्तौ पङ्क्तिपर्यायौ, क्रिया तु *"उख णख"* [सिद्ध. धातु. 63-64] इति दण्डकधातो *"रख-लखौ गत्यर्थौ"* [सिद्ध.धातु. 68-69] तयोः परोक्षा - [ए] । [17.20] **रजसीति** रजस् शब्दाद् ङिः, क्रिया तु रञ्जः सिवि । [17.21] **रेजेऽलिडिति** लिडिति तन्त्रान्तरसंज्ञा परोक्षाया, न लिट् अलिट्, रेजे इति

परोक्षा न भवतीत्यर्थः । तथाहि *“ऋजि गतिस्थानार्जनोर्जनेषु”* [सिद्ध.धातु. 664] अमुं केचिद् व्यञ्जनादि पठन्ति तन्मतेऽयं प्रयोगः । रेजे वर्तमाना- ए ।

उपलक्षणत्वाद् [17.22] **अजिनानी**त्यपि त्याद्यन्तं नञ्पूर्वस्य जिनातेरानिवि *“त्यादौ क्षेपे”* [सिद्ध.हेम. 3।2।126] इति नञो **[अजिनानि]** इति सिद्धं, स्याद्यन्तं तु चर्म्मपर्यायस्याऽजिनशब्दस्य जसि शसि वा । तथा [17.23] **आवे** [17.24] **जाये** इति प्राकृतसदृश्यौ क्रियायते, आङ्पूर्वस्य उङ्धातोर्वर्तमाना-ए सिद्ध**मावे** इति । अवतेर्वा परोक्षा-ए । **जाये** इति जनेर्वर्तमाना-ए ।।17।।

## अद्यौर्न नञ्समासोऽयं सर्वेषामिति चैकता । अन्येषामपरेषां च केषां कासां तथा दश ॥१८॥

**गुण०** [१८.१]न द्यौरद्यौरिति, नञ्समासः, अनञ्समासे तु ***द्युंक्*** [1]***अभिगमे*** [**सिद्ध.धातु**.**१०७७**], ह्यस्तन्याः सिवि, ***उत औविति व्यञ्जनेऽद्वेः*** [**सिद्धहेम.४।३।५९**] इत्युकारस्य औकारे, अडागमे, सस्य रुत्वे, विसर्गे च **अद्यौ**रिति सिद्धम् ।

[१८.२]**सर्वेषाम्** इति चैकता इति, ईषा = [2]हलदण्डः, सर्वा चासावीषा चेति कर्मधारये, ***अवर्णस्येवर्णादिना***[3] [**सिद्धहेम.१।२।६**]

1 गमने अ.२, अ.१ ।

2 दण्डः अ.२, पा.१ विना सर्वप्रतेषु ।

3 अवर्णस्येवर्णादिनैदोदरल् ।

[इति] अकारस्येकारेण सह एकारः, कर्मविवक्षायां, समानदीर्घत्वे च सिद्धं **सर्वेषाम्** इति ।

चः समुच्चये । [१८.३]तेन **चक्र** इत्यामन्त्र्यैकवचनान्तम् । बहुवचनान्तं तु ब्रूमः, ***डुकृंग् करणे*** [**सिद्ध.धातु**.८८८], परोक्षा - अ, ***द्विर्धातुः परोक्षा***[1] [**सिद्धहेम.४।१।१**] इत्यादिना द्वित्वे, ***ऋतोऽत्*** [**सिद्धहेम.४।१।३८**] इत्यृकारस्याकारे, ***कङश्चञ्*** [**सिद्धहेम.४।१।४६**] इति कस्य चे, ***इवर्णादेः***[2] [**सिद्धहेम.१।२।२१**] इत्यादिना रत्वे **चक्र** इति सिद्धम् ।

[१८.४]तथा **अवस्था** इत्येकवचनान्तं कथम् ? ***वसिक् आच्छादने*** [**सिद्ध.धातु.१११७**], ह्यस्तनी-थास्, अडागमे, सस्य रुत्वे, विसर्गे च सिद्धम् **अवस्था** इति ।

इदानीं प्रकृतम् उच्यते । [१८.५] **अन्येषाम्** [१८.६] **अपरेषां** च इति, अन्या चासावीषा च, अपरा चासावीषा चेति समासे शेषं पूर्ववत् ।

[१८.७][3]***ईष गति***[4]***हिंसादानेषु*** [**सिद्ध.धातु**.८**३३**], इषणम् ईषा, ***क्तेटो गुरोर्व्यञ्जनात्*** [**सिद्धहेम.५।३।१०६**] इत्यप्रत्ययः, ***आत्*** [**सिद्धहेम.२।४।१८**] इत्याप्, को = ब्रह्मा तस्य ईषा केषा

---

1 द्विर्धातुः परोक्षा-ङे प्राक्तु स्वरे स्वरविधेः ।

2 इवर्णादिरस्वे स्वरे यवरलम् ।

3 इष् पा.१ इषि पा.२ ।

4 धातुपाठे तु हिंसादर्शनेषु ।

इति षष्ठीसमासे, द्वितीयैकवचने, **केषाम्** इति सिद्धम् ।

[१८.८]**कासाम्** इति, ***कासृङ् शब्दकुत्सायाम्*** [**सिद्ध.धातु**.८४५], पूर्ववद् अप्रत्यये ***आत्*** [**सिद्धहेम.२।४।१८**] इत्यापि, द्वितीयैकवचने, **कासाम्** इति सिद्धम् ।

[१८.९]**दश** इति जसन्तं शसन्तं वा । एकवचनान्तं कथम् ? तदुच्यते, ***दंशं दशने*** [**सिद्ध.धातु**.४९६], पञ्चमी-हि, शवि, ***दंशसञ्जः शवि*** [**सिद्धहेम.४।२।४९**] इत्युपान्त्यनकारलोपे च **दश** इति सिद्धम् ॥१८॥

**जिन०** [18.1] *"द्युंक् अभिगमे"* [सिद्ध.धातु. 1077] इत्यस्य सिवि **अद्यौः** इति रूपम् । [18.2] **सर्वेषामि**ति ईषा = हलदण्डः सर्वा चासावीषा च सर्वेषा ताम् ।

चस्य समुच्चयार्थत्वात् [18.3] **चक्रे**ति नामन्त्र्यैकवचनान्तः किन्तु कृगः परोक्षा - अवचने बहुवचनान्तम् । तथा [18.4] **अवस्था** इत्यप्येकवचनान्तं *"वसिक् आच्छादने"* [सिद्ध.धातु. 1117] इत्यस्य ह्यस्तनी-थासि सिद्धिः ।

प्रकृतमुच्यते । [18.5] **अन्येषामि**ति अन्या चासावीषा च अन्येषा ताम् । [18.6] [एवम**परेषामि**त्यपि] । [18.7] **केषामि**ति *"ईष गति हिंसादर्शनेषु"* [सिद्ध.धातु. 833] ईषणम् ईषा, कस्य = ब्रह्मण ईषा ताम् । [18.8] **कासामि**ति *"कासृङ् शब्दकुत्सायाम्"* [सिद्ध.धातु. 845] कासनं कासा ताम् ।

[18.9] **दशेति** *"दंशं दशने"* [सिद्ध.धातु. 496] इत्यस्य हौ ।।18।।

**अगारं द्वे पदे स्यातां प्रथमान्तं शुनस्तथा ।**
**कर्तृरूपे कथं स्यातां दीयते धीयते तथा ॥१९॥**

**गुण०** [१९.१]अगारम् = गृहं तदेकं पदम् । पदद्वयं तु ब्रूमः, ***अग अकवत्*** [**सिद्ध.धातु.१०२२**], पञ्चमी-हि, शवि, ***अतः प्रत्ययाल्लुक्*** [**सिद्धहेम.४।२।८५**] इति हेर्लोपेऽग इति सिद्धम् । अरम् इति शीघ्रम् अत्यर्थं वा अगाकारस्यारम्, अकारेण सह दीर्घत्वे**ऽगारम्** इति पदद्वयं सिद्धम् ।

[१९.२]प्रथमान्तं शुनः तथा ***जुन शुनत् गतौ*** [**सिद्ध.धातु.१३७३-७४**] इत्यस्य शुनतीति, ***नाम्युपान्त्य***[1] [**सिद्धहेम.५।१।५४**] इत्यादिना के, प्रथमैकवचने, सस्य रुत्वे, विसर्गे च **शुन** इति सिद्धम् ।

[१९.३][१९.४]कर्तृरूपे[2] कथं स्यातां **दीयते धीयते** तथा इति, ***डुदांग्क् दाने*** [**सिद्ध.धातु.११३८**], ***डुधांग्क् धारणे च*** [**सिद्ध.धातु.११३९**], वर्तमाना-ते, ***क्यः शिति*** [**सिद्धहेम.३।४।७०**] इति क्ये, ***ईर्व्यञ्जनेऽयपि*** [**सिद्धहेम.४।३।९७**] इतीकारे, दीयते धीयते इति कर्मणि, कर्तरि च ***दीङ्च् क्षये*** [**सिद्ध.धातु.१२४४**], ***धीङ्च् अनादरे*** [**सिद्ध.धातु.१२४५**], वर्तमाना-ते, श्ये, **दीयते**

1 नाम्युपान्त्यप्रीकृगृज्ञः कः ।
2 कर्तृरूपं पा.२ विना सर्वप्रतेषु ।

**धीयते** [1]कर्तुरिति सिद्धौ ॥१९॥

**जिन०** [19.1] *“अग अकवत्”* [सिद्ध.धातु. 1022] इत्यस्य हौ अगेति रुपम्, अरं = शीघ्रं संहितायाम् **अगारम्** इति पदद्वयं सिद्धम् । [19.2] **शुन** इति *“जुन शुनत् गतौ”* [सिद्ध. धातु. 1373-74] इत्यस्य शुनतीति *“नाम्युपान्त्य०”* [सिद्ध. हेम. 5।1।54] इति के, प्रथमा सौ सिद्धम् । [19.3] **दीयते** [19.4] **धीयते** इति *“दीङ्च् क्षये”* [सिद्ध. धातु. 1244], *“धींङ्च् अनादरे”* [सिद्ध.धातु. 1245], वर्तमाना - ते, श्ये च कर्तरि सिद्धे ।।19।।

**त्याद्यन्तमालयं प्रोक्तमसमस्तमजापयः ।**
**अन्यान्यश्चालयं चैव ह्यनालयमशालयः ॥२०॥**

**गुण०** [२०.१]त्याद्यन्तम् **आलयं** प्रोक्तम् इति, आलयं = गृहम्, द्वितीयैकवचनान्तं चैतद्, क्रिया तु ***अली भूषणपर्याप्तिवारणेषु*** [**सिद्ध.धातु.११९**], अलन्तम् अलमानं वा प्रयुङ्क्ते, ***प्रयोक्तृव्यापारे णिग्*** [**सिद्धहेम.३।४।२०**] इति णिग्, ***ञ्णिति*** [**सिद्धहेम.४।३।५०**] इत्युपान्त्याकारस्य वृद्धिः, ह्यस्तन्या अम्व्, शव्, गुणः, ***एदैतोऽयाय्*** [**सिद्धहेम.१।२।२३**] इत्ययादेशः, ***स्वरादेस्तासु*** [**सिद्धहेम.४।४।३१**] इत्यादिवृद्धौ, **आलयम्** इति सिद्धम् ।

[२०.२]यदा तु ***ईगितः*** [**सिद्धहेम.३।३।९५**] फलवत्कर्तर्यात्मनेपदं तदा **आलये** इति ह्यस्तन्या इप्रत्यये, शवि,

1 इति कर्तरि सिद्धम् अ.२ ।

***अवर्णस्य***[1] [**सिद्धहेम.१।२।६**] इत्यादिनास्येकारेण सह एकारे, सप्तम्यन्तनामप्रतिरूपिका क्रिया ।

[२०.३.१]असमस्तम् **अजापय** इति, समासे तु अजायाः पय इति षष्ठीसमासः, क्रिया तु [2]***जप मानसे च*** [**सिद्ध.धातु.३३८**] इत्यस्य णिगि, पूर्ववद् उपान्त्यस्य वृद्धौ, ह्यस्तन्याः सिवि, शवि, अडागमे, गुणे, अयादेशे, सस्य रुत्वे, विसर्गे च **अजापय** इति सिद्धम् ।

[२०.३.२]अथवा ***जिं ज्रिं अभिभवे*** [**सिद्ध.धातु.८-९**] इत्यस्य जयन्तं प्रयुङ्क्ते, णिगि, ***णौ क्रीजीङः*** [**सिद्धहेम.४।२।१०**] इतीकारस्याकारः, ***अर्तिरी***[3] [**सिद्धहेम.४।२।२१**] इत्यादिना पोन्तः, शेषं पूर्ववत् ।

अन्या**न्यश्चालयं** चैव इत्यपराण्यप्येवं द्रष्टव्यानीत्यर्थः । तानि चोच्यन्ते ।

[२०.४.१]***अव रक्षणे*** [**सिद्ध.धातु.४८९**] इत्यादिदण्डकधातुः, वर्तमाना-सिवि, शवि, **अवसि** इति सिद्धम् । [२०.४.२]तथा ***वसिक् आच्छादने*** [**सिद्ध.धातु.१११७**], ह्यस्तन्या इप्रत्यये, अडागमे, **अवसि** इति सिद्धम् ।

---

1 अवर्णस्येवर्णादिनैदोदरल् ।

2 रप लप जल्प व्यक्ते वचने [सिद्ध.धातु.३३५-३३७] सु.१ पा.१ अ.२, रप जप लप जल्प व्यक्ते वचने अ.३ ।

3 अर्तिरीव्लीह्रीक्नूयीक्ष्माय्यातां पुः ।

[२०.५.१] [२०.५.२]अव इत्युपसर्गः, अवतेः [1]पञ्चमी हि क्रिया वा ।

[२०.६.१]एवम् **अशुभम्** इत्युभयत्र त्याद्यन्तं ह्यस्तन्याम् अद्यतन्यां वा । [2]***शुभि दीप्तौ*** [**सिद्ध.धातु**.९४७] इत्यस्य ***द्युद्भ्योऽद्यतन्याम्*** [**सिद्धहेम.३।३।४४**] इत्यात्मनेपदस्य विकल्पनात् पक्षे ***शेषात्परस्मै*** [**सिद्धहेम.३।३।१००**] इति परस्मैपदे, अद्यतनी-अमि, ***लृदिद्द्युतादि***[3] [**सिद्धहेम.३।४।६४**] इत्यादिनाङि, अडागमे, ***लुगस्यादेत्यपदे*** [**सिद्धहेम.२।१।११३**] इत्यलोपे, **अशुभम्** इति सिद्धम् ।

[२०.६.२][4]*अथवा ***शुभ शुम्भत् शोभार्थे*** [**सिद्ध.धातु.१३८७-८८**], ह्यस्तनी-अम्व्, ***नो व्यञ्जनस्यानुदितः*** [**सिद्धहेम.४।२।४५**] इति नलोपे शेषं पूर्ववत्* ।

[२०.७] [२०.८]***धुक्षि धिक्षि सन्दीपनक्लेशनजीवनेषु*** [**सिद्ध.धातु.८७६-८७७**], ह्यस्तनी-त, शवि, अडागमे, **अधुक्षत अधिक्षत** इति [5]द्वे रूपे सिद्धे ।

[२०.९] [२०.१०]अद्यतन्यां तु ***दुहींक् क्षरणे*** [**सिद्ध.**

---

1 तेः पञ्चमी वा सु.१ पा.२। तेः पञ्चमी च अ.२ ।

2 शुभ शुम्भत् शोभार्थे [सिद्ध.धातु. १३८७-८८] पा.१, पा.२, अ.३, अ.२ ।

3 लृदिद्द्युतादिपुष्यादेः परस्मै ।

4 *...*एतच्चिह्नान्तर्गतः पाठः अ.२ मध्ये नास्ति ।

5 द्वे अ.२ विना नास्ति ।

**धातु.११२७]**, ***दिहींक् लेपे*** **[सिद्ध.धातु.११२८]** इत्यस्य च, अद्यतनी-त, ***हशिटो नाम्युपान्त्य***[1] **[सिद्धहेम.३।४।५५]** इत्यादिना सकि, अडागमे, ***भ्वादेर्दादेर्घः*** **[सिद्धहेम.२।१।८३]** इति हस्य घे, ***गडदबादेः***[2] **[सिद्धहेम.२।१।७७]** इति दस्य धे, ***अघोषे प्रथमोऽशिटः*** **[सिद्धहेम.१।३।५०]** इति घकारस्य ककारे, षत्वे, पूर्ववद् रूपे । ***दुहदिहलिहगुहो***[3] **[सिद्धहेम.४।३।७४]** इत्यादिना सक्लोपे, **अदुग्ध अदिग्ध** इति रूपे [4]सिद्धे ।

[२०.११.१]**अपुरिति**, ***पांक् रक्षणे*** **[सिद्ध.धातु.१०६७]**, ह्यस्तनी-अनि, ***वा द्विषातोऽनः पुस्*** **[सिद्धहेम.४।२।९१]** इति पुसादेशे, ***इडेत्पुसि चातो लुक्*** **[सिद्धहेम.४।३।९४]** इत्याकारलोपे, अडागमे, **अपुरिति** सिद्धम् । [२०.११.२]अद्यतन्यां तु ***पां पाने*** **[सिद्ध.धातु. २]**, अद्यतनी - अनि, *[5]सिच्, ***पिबैति***[6] **[सिद्धहेम.४।३।६६]** इत्यादिना सिच् लुक्*, ***सिज्विदोऽभुवः*** **[सिद्धहेम.४।२।९२]** इति पुसादेशे शेषं पूर्ववत् ।

[२०.१२]एवं ***दांवक् लवने*** **[सिद्ध.धातु.१०७०]** इत्यस्य

---

1 हशिटो नाम्युपान्त्याददृशोऽनिटः सक् ।

2 गडदबादेश्चतुर्थान्तस्यैकस्वरस्यादेश्चतुर्थः स्ध्वोश्च प्रत्यये ।

3 दुहदिहलिहगुहो दन्त्यात्मने वा सकः ।

4 सिद्धे अ.१ विना नास्ति ।

5 *...*एतच्चिह्नान्तर्गतस्य पाठस्य स्थाने सिचो वा इत्यादिना सिचो लुक् इत्येवं अ.२ विना सर्वप्रतेषु ।

6 पिबैतिदाभूस्थः सिचो लुप् परस्मै न चेट् ।

शेषं पातिना तुल्यम्। ततो अदुरिति रूपम्। [1]दासञ्ज्ञायां तु ***डुदांग्क् दाने*** [**सिद्ध.धातु**.**११३८**], अद्यतनी-अनि, शेषं पिबतिवत्। ततो **अदुरिति** सिद्धम्।

[२०.१३]तथा ***लिहींक् आस्वादने*** [**सिद्ध.धातु**.**११२९**], ***लिशं*** [2]***ऋषैत् गतौ*** [**सिद्ध.धातु**.**१४१७-१८**], अद्यतन्याः सिव्, ***हशिटो नाम्युपान्त्य***[3] [**सिद्धहेम.३।४।५५**] इत्यादिना सक्, ***हो धुट्पदान्ते*** [**सिद्धहेम.२।१।८२**] [इति] ढत्वम्, ***यजसृज***[4] [**सिद्धहेम.२।१।८७**] इत्यादिना षत्वम्, ***षढोः कः सि*** [**सिद्धहेम.२।१।६२**] इति षढयोः कत्वे, ***सो रुः*** [**सिद्धहेम.२।१।७२**] इति रुत्वे विसर्गे च **अलिक्ष** इति सिद्धम्। द्रव्यशब्दस्य तु न विद्यते लिक्षाऽस्येत्यलिक्षः ।

[२०.१४] [२०.१५]***रुहं जन्मानि*** [**सिद्ध.धातु**.**९८८**], [5]***रिशं रुशंत् हिंसायाम्*** [**सिद्ध.धातु**.**१४१३-१४**], अद्यतनी - सि, [6]***हशिटो नाम्युपान्त्य***[7] [**सिद्धहेम.३।४।५५**] इत्यादिना सकि, उभयत्र शेषं पूर्ववत्। **अरुक्षः** [8]**अरिक्ष** इति सिद्धम्।

---

1 दा सञ्ज्ञा तु न, अद्यतनी. अ.२, पा.२, दासञ्ज्ञायां तु पा.१, सु.१ ।

2 हृषैति सु.१ ऋषैति पा.२, अ.१, अ.२ ।

3 हशिटो नाम्युपान्त्याददृशोऽनिटः सक् ।

4 यजसृजमृजराजभ्राजभ्रस्जव्रश्चपरिव्राजः शः षः ।

5 धातुपाठे तु रूशं रिशंत् हिंसायाम् ।

6 हशिटो. ...सकि इत्यस्य स्थाने शवि अ.१, अ.२, सकि सु.१, अ.३, पा.२ ।

7 हशिटो नाम्युपान्त्याददृशोऽनिटः सक् ।

8 अरिक्षः अ.२ विना नास्ति ।

यदा त्वत्र पूर्वत्र च ***शिट्याद्यस्य द्वितीयो वा*** [**सिद्धहेम.१।३।५९**] इति द्वितीये कृते [२०.१६]**अलिख्यः** [२०.१७]**अरुख्यः** [२०.१८][1]**अरिख्य** इति भवति ।

[२०.१९.१] [२०.१९.२]***विष्लृंकी व्याप्तौ*** [**सिद्ध.धातु.११४३**], अद्यतनी-सिः, अडागमे, ***लृदिद्द्युतादि***[2] [**सिद्धहेम.३।४।६४**] इत्यादिनाङि, सस्य रुत्वे, विसर्गादेशे च **अविष** इति सिद्धम् । न विद्यते विषम् अस्येत्यविषः । यद्वा ***अव रक्षणे*** [**सिद्ध.धातु.४८९**] इति दण्डकधातुः, [3]अविमह्योष्टिषः [**उणा-५४७**] इत्यनेन इषप्रत्ययः, ***अधातुविभक्ति***[4] [**सिद्धहेम.१।१।२७**] इत्यादिना नामत्वे, प्रथमैकवचनं सिः, सस्य रुत्वे, विसर्गादेशे च **अविष** इति सिद्धम् ।

[२०.२०]**अश्वालयं** चैव इति, अश्वानाम् आलयः, शुनाम् आलय इति वा, पश्चान्नञ्समासे, द्वितीयायाम् अश्वालयम् इति सिद्धम्, समासे चैतद् । असमासे तु ***श्वल श्वल्ल आशुगतौ*** [**सिद्ध.धातु.४५०-४५१**] इत्यस्य पूर्ववद् णिगि, वृद्धौ, ह्यस्तनी-अम्वि, अडागमे, शवि, गुणे, अयादेशे, **अश्वालयम्** इति सिद्धम् । हिः छन्दःपूरणे ।

[२०.२१]**अनालयम्** इति, न विद्यते आलयोऽस्येति

---

1 अरिख्यः अ.२ विना नास्ति ।

2 लृदिद्द्युतादिपुष्यादेः परस्मै ।

3 उणादौ तु मह्यविभ्यां टित् [उणा. ५४७]

4 अधातुविभक्तिवाक्यमर्थवन्नाम ।

अनालयम् इति सामासिकम् । असमासे तु ***णल गन्धे*** [**सिद्ध. धातु**.९७८] इत्यस्य ***पाठे धात्वादेर्णो नः*** [**सिद्धहेम.**२।३।९७] इति णस्य नत्वे, शेषं णिगाद्यश्वालयवत् ।

[२०.२२]**अशालय** इति, शालिशब्दस्य नञा सह समासे ततो जस् । क्रिया तु ***पल फल शल गतौ*** [**सिद्ध.धातु**.९८२-९८४] इत्यस्य शलन्तं प्रयुङ्क्ते, णिग्, ह्यस्तन्याः सिवि, शवि, शेषं वृद्ध्यादि पूर्ववत् ॥२०॥

**जिन०** [20.1] अलतेर्णिगि, ह्यस्तनी-अम्वि **आलयम्** इति सिद्धम्। [20.2] एवं ह्यस्तनी-इवचने **आलये** इति ज्ञेयम् । [20.3.1] [20.3.2] **अजापय** इति अजायाःपयोऽजापय इति तावत् समस्तम्, असमस्तं तु जवतेर्णिगि, सिवि च **अजापय** इति क्रिया, जपतेर्वा ण्यन्तस्य । अन्यानीभि(ति) अपराण्यप्येवमसमस्तानि द्दष्टव्यानि । [20.4] **अशुभम्,** [20.5] **अविषः**, [20.6] **अलिक्षः** इत्यादीनि । [20.7] **अश्वालयमि**ति असमस्तमिति वर्त्तते *"श्वल श्वल्ल आशुगतौ"* [सिद्ध.धातु. 450-451] इत्यस्य णिगि, अम्वि रूपम् । हिः पूरणे । एवम् [20.8] **अनालयमि**ति *"णल गन्धे"* [सिद्ध.धातु. 978] । [20.9] **अशालय** इति *"पल फल शल गतौ"* [सिद्ध.धातु. 982-984] इत्यस्य णिगि, सिवि, असमस्तमित्यत्रापि ज्ञेयम् ।।20।।

**अव्याधयोऽसमस्तं स्याद्येयेषाञ्चक्रिरे पदम् ।**
**अक्षेपयस्तथा चान्यदक्षेवयममीवयम् ॥२१॥**

**गुण०** [२१.१]**अव्याधय** इति, न विद्यते व्याधिर्येषां तेऽव्याधय इति जसि समासपदे । असमासपदं तु [1]***व्यधंच् ताडने*** [**सिद्ध.धातु.११५७**] इत्यस्य णिगि, ह्यस्तन्याः सिवि, शेषं वृद्ध्यादि पूर्ववद् । यदा तु ***ईंगितः*** [**सिद्धहेम.३।३।९५**] इति फलवत् कर्तर्यात्मानेपदोत्तमत्रिकैकवचनम्, इप्रत्यये तदा चतुर्थ्यन्तसदृशम् **अव्याधय** इति सिद्धम् ।

[२१.२]**येयेषाञ्चक्रिरे** पदम् इति *[2]पदत्रयसदृशं [3]कथम् ? इत्युच्यते*, ***येषृङ् प्रयत्ने*** [**सिद्ध.धातु.८३५**], ***व्यञ्जनादेः***[4] [**सिद्धहेम.३।४।९**] इत्यादिना यङि, ***सन्यङश्च*** [**सिद्धहेम.४।१।३**] इति द्वित्वे, ***व्यञ्जनस्यानादेर्लुक्*** [**सिद्धहेम.४।१।४४**] [5]इत्यादिनानादिव्यञ्जनलोपे, ***ह्रस्वः*** [**सिद्धहेम.४।१।३९**] इति ह्रस्वत्वे, [6]***आगुणावन्यादेः*** [**सिद्धहेम.४।१।४८**] इति गुणे, *परोक्षा-इरे* ***धातोरनेकस्वरा***[7] [**सिद्धहेम.३।४।४६**] इत्यादिना

---

1 व्यधंक् अ.१ पा.१ विना सर्वप्रतेषु ।
2 *...*एतच्चिह्नान्तर्गतः पाठः अ.३ मध्ये नास्ति ।
3 शमेकं क० अ.२ ।
4 व्यञ्जनादेरेकस्वराद् भृशाभीक्ष्ण्ये यङ्वा ।
5 अनादि पा.१ विना नास्ति ।
6 आगु.. गुणे यावत् सु.१ विना नास्ति ।
7 धातोरनेकस्वरादाम् परोक्षायाः कृभ्वस्ति चानु तदन्तम् ।

परोक्षायाः स्थाने आमादेशे, ***अतः*** [**सिद्धहेम.४।३।८२**] इत्यलोपे, ***योऽशिति*** [**सिद्धहेम.४।३।८०**] इति यलोपः, ततः [1]***परोक्षायाः कृभ्वस्ति***[2] [**सिद्धहेम.३।४।४६]** इति कृगनुप्रयोगे, द्वित्वे कृते, [3]***व्यञ्जनस्यानादेः***[4] [**सिद्धहेम.४।१।४४**] इत्यादिना व्यञ्जनलोपे, ***ऋतोऽत्*** [**सिद्धहेम.४।१।३८**] इति पूर्वस्य ऋकारस्याकारे, ***कङश्चञ्*** [**सिद्धहेम.४।१।४६**] इति कस्य चे, ***तौ मुमो व्यञ्जने स्वौ*** [**सिद्धहेम.१।३।१४**] इति मकारस्यानुस्वारे, ऋकारस्य रत्वे च सति **येयेषाञ्चक्रिरे** पदम् इति सिद्धम् ।

[२१.३]**अक्षेपयः** तथा चान्यद् इति, पदद्वयसदृशम्, एकं तु ***क्षिपींत् प्रेरणे*** [**सिद्ध.धातु.१३१७**], णिगि, उपान्त्यस्य गुणे, ह्यस्तन्याः सिवि, शेषं पूर्ववत्, सिद्धम् **अक्षेपय** इति ।

चः समुच्चये । [२१.४]तेन [5]***घटिष् चेष्टायाम्*** [**सिद्ध.धातु.१०००**] इत्यस्य यङि, तस्य लोपे, द्वित्वे, अनादिव्यञ्जनलोपे, ***द्वितीयतुर्ययोः पूर्वौ*** [**सिद्धहेम.४।१।४२**] इति घस्य गे, ***गहोर्जः*** [**सिद्धहेम.४।१।४०**] इति गस्य जे, ***आगुणावन्यादेः*** [**सिद्धहेम.४।१।४८**] इत्याकारे, ह्यस्तनी-अम्वि, शवि, अडागमे, **अजाघटम्** इति सिद्धम् ।

---

1 परोक्षायां पा.१ ।

2 धातोरनेकस्वरादाम् परोक्षायाः कृभ्वस्ति चानु तदन्तम् ।

3 व्यञ्ज....लोपे यावत् पा.२ विना नास्ति ।

4 व्यञ्जनस्यानादेर्लुक् ।

5 घटिक् सु.१ ।

[२१.५.१] [२१.६.१]तथा [1]आपत्शब्दाद् विपत्पर्यायात् सौ, आपत् आप इति जलपर्यायाद् जसि च द्रव्यवाचिनौ सिद्धौ। क्रियायां तु ब्रूमः, [2]***आप्लृंट् व्याप्तौ*** **[सिद्ध.धातु.१३०७]**, एकत्र अद्यतनी-दिः, अपरत्र सिः ***लृदिद्द्युतादि***[3] **[सिद्धहेम.३।४।६४]** इत्यादिनाङि, [4]अडागमे, [5]एकत्र ***विरामे वा*** **[सिद्धहेम.१।३।५१]** इति दस्य प्रथमत्वे, अपरत्र सस्य रुत्वे, विसर्गादेशे **आपत्, आप** इति [6]सिद्धौ।

[२१.५.२] [२१.६.२]***आप्लृण् लम्भने*** **[सिद्ध.धातु.४०५]** इत्यस्य तु युजादित्वाद् णिजभावपक्षे ह्यस्तन्याम् अद्यतन्यां च साधारणं रूपम्। यदा ह्यस्तनी तदा शव्, यदा अद्यतनी तदा अङ्, ततः च **आपत् आप** इति रूपद्वयं सिद्धम्।

[२१.७] [२१.८]कः = ब्रह्मा, अः = [7]कृष्णः, स इवाचरतीति ***कर्तुः क्विप्***[8] **[सिद्धहेम.३।४।२५]** इति क्विपि, तस्य लोपे, ततः

---

1 आपद् इति आङ्पूर्वस्य पद्यतेः क्विपि, तस्य लोपे, सौ, दीर्घङ्याब् [सिद्धहेम. १।४।४५] इति तस्य लोपे, दस्य प्रथमत्वे, आपत् इति सिद्धम्। आपः इति च जलपर्यायाज्जसि द्रव्यवाचि। क्रियायां पा.१ अ.१ विना सर्वप्रतेषु।

2 आप्लृंट् व्याप्तौ पा.१, अ.२, अ.३ मध्ये नास्ति।

3 लृदिद्द्युतादिपुष्यादेः परस्मै।

4 स्वरादेस्तासु [सिद्धहेम. ४।१।३१] इति सूत्रं भवितव्यम्, स्वरादित्वात्।

5 समानदीर्घत्वे अ.१ विना सर्व प्रतेषु अधिकम्।

6 सिद्धं अ.१ विना सर्वप्रवेषु।

7 विष्णुः पा.१।

8 कर्तुः क्विप् गल्भक्लीबहोडात्तु ङित्।

त्याद्युत्पत्तौ शवि, ***लुगस्यादेत्यपदे*** [**सिद्धहेम.२।१।११३**] इत्यलोपे, **कति कतः कन्ति, कसि कथः कथ, कामि कावः कामः** । ***मव्यस्याः*** [**सिद्धहेम.४।२।११३**] इत्याकारः । इति कानिचिद् द्रव्यशब्दसदृशान्यपि। **अति अतः अन्ति, असि अथः अथ, आमि आवः आमः**।

[1]शतरि तु **कन् कन्तौ कन्तः** इत्यादिसप्तस्वपि स्यादिषु विभक्तिषु योज्यम् । *[2]**अन्, अन्तौ, अन्तः** इत्येवं सर्वास्वपि स्यादिषु योज्यम्* ।

[२१.९] पञ्चम्या आनिवि, **कानि** इति नपुंसके वर्तमानस्य किम्शब्दस्य जसन्तस्य शसन्तस्य वा प्रतिरूपिका क्रिया ।

[२१.१०]***राजृग् टुभ्राजि दीप्तौ*** [**सिद्ध.धातु**.८९३-८९४] इत्यस्य शतरि **राजन्** इत्यामन्त्र्यसदृशम् ।

तथा ***उक्ष सेचने*** [**सिद्ध.धातु**.५६६], । [3]***युक् मिश्रणे*** [**सिद्ध.धातु**.१०८०], ***पूर्व पर्व मर्व पूरणे*** [**सिद्ध.धातु**.४५४-४५६], ***उर्वै तुर्वै*** [**सिद्ध.धातु**.४७०-४७१] ***धुर्वै*** [**सिद्ध.धातु**.४७४] इत्यादिदण्डकधातुः, ***अर्व हिंसायाम्*** [**सिद्ध.धातु**.४७६], ***पूष वृद्धौ*** [**सिद्ध.धातु**.५००], एषां शतरि सौ, आमन्त्र्यान्तशत्रन्तानि [२१.११]

---

1 शत्रि अ.३, पा.२, अ.२ ।

2 *...*एतच्चिह्नान्तर्गतः पाठः सु.१ विना नास्ति ।

3 युकि सु.१, अ.२। युक अ.१ ।

**उक्षन्**, [२१.१२]**युवन्**, [२१.१३][1]**पर्वन्**, [२१.१४][2]**अर्वन्**, [२१.१५]**पूषन्**, [२१.१६][3]**उर्वन्**, ***नामन्त्र्ये*** [**सिद्धहेम.२।१।९२**] इति नलोपप्रतिषेधः । आमन्त्र्याद् अन्यत्र तु नस्य स्थानिवद् नकारस्य लोपप्राप्तिरेव नास्ति ।

[२१.१७]**अक्षेवयम्** इति पदद्वयसदृशम् । ***ष्टिवू क्षिवू निरसने*** [**सिद्ध.धातु.४६३-४६४**], णिग्, उपान्त्यस्य गुणे, ह्यस्तन्या अम्वि, शवि, गुणे, अयादेशे, ***लुगस्यादेत्यपदे*** [**सिद्धहेम.२।१।११३**] इत्यलोपे, अडागमे, **अक्षेवयम्** इति ।

[२१.१८]**अमीवयम्** इति, ***पीव मीव तीव नीव स्थौल्ये*** [**सिद्ध.धातु.४६६-४६९**], शेषं पूर्ववत्, ह्यस्तनी-अम्वि, गुणाभावः तु विशेषः ।[4]

चः समुच्चयार्थः सर्वत्रानुसरणीयः ।

[२१.१९]तेन **शेषे** इति सप्तम्यन्तं वर्तमानान्तं च । सप्तम्यन्तं तु सुबोधम् । क्रिया तु ***शीङ्क् स्वप्ने*** [**सिद्ध.धातु.११०५**], वर्तमाना-से, ***शीङ एः शिति*** [**सिद्धहेम.४।३।१०४**] इत्येकारः, **शेषे** इति सिद्धम् ।

[२१.२०]**देवते** इत्यामन्त्र्यं स्यन्तम् । त्याद्यन्तं तु ***तेवृङ***

1 पूर्वन् अ.१ । सु.१ मध्ये नास्ति ।

2 उर्वन् पा.२ । अ.१ मध्ये नास्ति ।

3 अर्वन् पा.२ ।

4 विशेषार्थः पा.१, पा.२, अ.३, अ.१ ।

***देवृङ् देवने*** [**सिद्ध.धातु**.**८१६-८१७**] इत्यस्य वर्तमाना- ते, शवि, **देवते** इति सिद्धम् ।

[२१.२१]**नस्याद्** इति स्याद्यन्तं त्याद्यन्तं च । तत्र स्याद्यन्तं नस्य शब्दात् पञ्चम्येकवने सुबोधम् । त्याद्यन्तं तु अस्तेर्नञ्पूर्वात् सप्तम्या यात्प्रत्यये सुगमम् एव ।

[२१.२२]**देवताम्** इति देवताशब्दाद् द्वितीयान्तं स्याद्यन्तम् । त्याद्यन्तं तु ***तेवृङ् देवृङ् देवने*** [**सिद्ध.धातु**.**८१६-८१७**] इत्यस्य पञ्चमी-ताम्, शवि, **देवताम्** इति त्याद्यन्तं सिद्धम् ।

तथा भ्वादितुदादिदिवादीनां वर्तमाना तिवि यानि रूपाणि तान्येव शत्रन्तानि सप्तम्याम् । [भवति ।]

तथा पूर्वेषाम् एव धातूनां यानि वर्तमानायाः तसि तान्येव षष्ठीपञ्च-म्योरेकवचनेऽपि । [भवतः।]

तथा पूर्वाभिहितान्यत्र [1]यानि पञ्चमी[2]प्रथमत्रिकद्विवचनान्तानि तान्येव षष्ठीबहुवचनान्यपि । [भवताम् ।]

तथा यानि वर्तमाना[3]प्रथमत्रिकबहुवचनान्तानि तान्येव नपुंसके जसि शसि च । *ङ्यां च* ***श्यशवः*** [**सिद्धहेम.२।१।११६**] इत्य[4]न्तादेशकरणाद् आमन्त्र्यार्थे[5] सौ वर्तमानाप्रथमत्रिकबहुवचना-

1 यानि सु.१ अ.२ विना नास्ति ।

2 पञ्चमात्रिकैकद्वि पा.१, पा.२, अ.३. पञ्चम्येकत्रिकद्वि अ.२ ।

3 प्रथम पा.१ अ.१, अ.२ विना नास्ति ।

4 त्यतोऽन्ता सु.१ ।

5 त्र्ये अ.२ विना सर्वप्रतेषु ।

न्तसदृशानि रूपाणि । [भवन्ति ।]

भ्वादितुदादिदिवादीनां तु शतरि ततः षष्ठीबहुवचने यानि [1]पञ्चम्याः परस्मैपदप्रथमत्रिकद्विवचनान्तानि तान्येव पञ्चम्या आत्मनेपद [2]प्रथमत्रिकैकवचनेऽपि। [पचताम् ।]

दिवादेर्भावकर्मणोरपि प्रयोगे पञ्चम्याः परस्मैपदप्रथमत्रिकद्विवचनसदृशम् एव। एवम् उत्तरेष्वपि प्रयोगेषु । [दिव्यताम् ।]

तथा यानि कानिचिद् रूपाणि ह्यस्तनीपरस्मैपद ते [3]तान्येवात्मनेपद ते । तत्राप्युभयपदीनाम् एवात्मनेपदप्रथमत्रिकैकवचनेऽपि रूपम् । [अभवत ।]

क्रमेः तु वृत्ताद्यर्थेष्वात्मनेपदत्वान्नायं प्रकारः ।

तथा नित्यानिटां [4]सेटां च सामान्यं यच्च ह्य(श्व)स्तनीपरस्मैपद[5]प्रथमत्रिकवचनेन तदेवात्मनेपदे [6]प्रथमत्रिकवचनेऽपि[7] । [कर्ता कर्तारौ कर्तारः । रक्षिता रक्षितारौ रक्षितारः ।]

तद् अमुना प्रकारेण विषमप्रयोगात्[8] पर्यनुयुज्यमानान-

1 ०नि परस्मै अ.२। पञ्चमी अ.३, पा.२, सु.१ ।

2 त्रिक अ.१ मध्ये नास्ति ।

3 ०पदप्रथमत्रिकैकवचनेऽपि पा.२ ।

4 सेटां अ.३, पा.२, अ.२ मध्ये नास्ति ।

5 मध्यमत्रिकबहुवचनेन पा.१, अ.३, अ.२ ।

6 त्रिकैकवचनेऽपि सु.१, पा.२, अ.२ ।

7 केषुचित् प्रतेषु इत्यधिकम् "तथा यदेव सप्तमीपरस्मैपदमध्यमत्रिकबहुवचने तदेवात्मनेपद प्रथमत्रिकैकवचनेऽपि ।" [पचेत]

8 गेन पा.२ ।

नुसृत[1]प्रस्तुत-ग्रन्थसरणयः कतिपये प्रतिहतप्रतिभाविशेषत्वेऽनुत्तरम् उत्तरम् अलभमानाः सन्तः प्रभवन्ति प्रस्वेदबिन्दून्, स्वीकुर्वन्ति जृम्भाम्, आनन्दन्ति निद्रामुद्राम्, जल्पन्ति किञ्चित्तथाविधाभिधेयशून्यः[2], निरीक्षन्ते हरितः, पश्यन्त्यन्तरिक्षम्, विलोकयन्ति च भूयोभूयः सर्वंसहावलयम् इति । तथा चोक्तं सुगृहीतनामधेयैः श्री**सिद्धसेनदिवाकर**पादैः—

***स्वेदं समुद्वहति जृम्भणमातनोति***
***निद्रायते किमपि जल्पति वस्तुशून्यम् ।***
***आशां विलोकयति खं पुनरेव धात्रीं***
***भूताभिभूत इव दुर्वदकः सभायाम् ॥***

इति ज्ञात्वैतदनुसारिचेतो विधेयमित्यलं प्रसङ्गेन ।

**अकारि गुणचन्द्रेण वृत्तिः स्वपरहेतवे ।**
**देवसूरिक्रमाम्भोजचञ्चरीकेण सर्वदा ।।**

**कृत्वेत्थं रचनां पुण्यं यन्मयाप्तं सुनिर्मलम् ।**
**पारं शब्दोदधेस्तेन सर्वदा जन [3]इग्रि(यॄ)यात् ।।**

**मयात्र मतिमान्द्याद्यत्किञ्चिदूचे यथातथम् ।**
**प्रसादबुद्धिमाधाय शोध्यं तच्छब्दवेदिभिः ॥**

**षट्तर्ककर्कशमतिः कविचक्रवर्ती**
**शब्दानुशासनमहाम्बुधिपारदृश्वः ।**

---

1 प्रस्तुत पा.२ मध्ये नास्ति ।

2 वस्तुवन्ध्यं अ.२ ।

3 जनइ प्रियात् सु.१ अ.३ अ.२, जन प्रियात् अ.१ ।

**शिष्याम्बुजप्रकरजृम्भणचित्रभानुः**
**कक्कल्ल एव सुकृती जयति स्थिरायाम् ॥**

इति पण्डितपुण्डरीकेण श्रीकक्कलोपदेशेन तत्त्वप्रकाशिका-वृत्तिः श्रीदेवसूरिपादपद्मोपजीविना गुणचन्द्रेण स्वपरोपकारार्थं श्रीहेमचन्द्रव्याकरणा[1]नुसारेण [2]प्रणायि ॥२१॥

**जिन०** [21.1] **अव्याधय** इति समस्तं सुगमम्, असमस्तं तु *"व्यधंच् ताडने"* [सिद्ध. धातु. 1159] इत्यस्य णिगि, सिवि च सिद्धम् [21.2] **येयेषाञ्चक्रिरे** पदमिति पदत्रयसदृशमेकं कथमिति ब्रूमः *"येषृङ् प्रयत्ने"* [सिद्ध.धातु. 835] इत्यस्य यङि, द्वित्वादौ, परोक्षा-इरे, *"धातोरनेकस्वराद्०"* [सिद्ध. हेम. 3।4।46] इत्यामि कृगनुप्रयोगे *"अतः"* [सिद्ध. हेम. 4।3।82] इत्यलोपे, *"योऽशिति"* [सिद्ध. हेम. 4।3।80] इति यलोपे च सिद्धम् । [21.3] **अक्षेपय** इति पदद्वयसदृशम् एकं तु क्षिपतेर्णिगि, सिवि च सिद्धम् ।

चः समुच्चये । तेन [21.4] घटेर्यङ्लुबन्तस्य अम्वि **अजाघटम्** इति सिद्धम्। [21.5] **अक्षेवय**मिति पदद्वयसदृशं *"ष्टिवू क्षिवू निरसने"* [सिद्ध. धातु. 463-464] इत्यस्य णिगि, अम्वि सिद्धिः । [21.6] **अमीवय**मिति मीवधातुःस्थौल्ये शेषं

1 रणाभिप्रायेण अ.३, अ.१, अ.२ ।
2 यीति अ.२ ।

पूर्ववत् । अनया दिशाऽन्येऽप्यूह्याः । तथाहि [21.7] **आपत्** [21.8] **आपः** [21.9] **शेषे** [21.10] **देवते** [21.11] **देवताम्** एते प्रयोगाः स्याद्यन्तास्त्याद्यन्ताश्च लक्षयितव्याः । [21.12] को=ब्रह्मा, अः=विष्णुः आचारक्विबन्ताभ्यामाभ्यां **कति**, **कतः**, **कन्ति** । **कसि**, **कथः**, **कथ** । **कामि**, **कावः**, **कामः** ॥ **अति**, **अतः**, **अन्ति** । **असि**, **अथः**, **अथ** । **आमि**, **आवः**, **आमः** ॥ इत्यादि । एवं [21.13] **कानी**ति क्लीबे जसि शसि वा तथाऽऽचारक्विबन्तात् कशब्दात् पञ्चम्यानिवि त्याद्यन्तोऽपि । एवं [21.14] राजृग: शतरि **राजन्** इत्यामन्त्र्यप्रतिरूपकम् । तथा *"उक्ष सेचने"* [सिद्ध.धातु. 566], *"युक् मिश्रणे"* [सिद्ध.धातु. 1080], *पूर्व पर्व मर्व पूरणे* [सिद्ध. धातु. 454-456], *"अर्व हिंसायाम्"* [सिद्ध. धातु. 476], *पूष वृद्धौ* [सिद्ध.धातु. 500] एषां शतरि सौ [21.15] **उक्षन्**, [21.16] **युवन्**, [21.17] **पर्वन्**, [21.18] **अर्वन्**, [21.19] **पूषन्** एते आमन्त्र्यसदृशाः । तथा —

भुवादि-तुदादि-दिवादीनां वर्तमाना-तिवि यानि रूपाणि तान्येव शतत्रन्ता (शत्रन्तानि) सप्तम्याम् ।

एषामेव च धातूनां यानि वर्तमाना - तसि तान्येव शत्रन्तात् षष्ठी पञ्चम्योरेकवचनेऽपि ।

तेषामेव धातूनां यानि पञ्चमी [प्रथमात्रिकद्विवचनान्तानि] तानि तान्येव षष्ठी बहुवचनेऽपि ।

तेषामेव च यानि वर्तमाना - अन्तौ तान्येव क्लीबे जसि शसि च । ङ्यां चामन्त्र्य-सौ ।

एवमन्येष्वपि प्रयोगेषु मिथः सारूप्यं स्वधियाऽभ्यूह्य वाच्यम् । किञ्च रेकृङ् शङ्कार्थस्य माङ्युपपदे, णिगि, अद्यतनी-मप्रत्यये *"णिश्री०"* [सिद्धहेम. 3।4।58] इति ङेर्द्वित्वादौ च सिद्धं [21.20] **मा रिरेकाम** इति । एवं मीमृधातोः [21.21] **मा मिमीमाम** । *"मील श्मील स्मील क्ष्मील निमेषणे"* [सिद्ध. धातु. 392-396] इत्यस्य णिगि अद्यतन्या-ङप्रत्यये *"भ्राजभ्रास०"* [सिद्धहेम. 4।2।36] इत्यादिना उपान्त्यस्य च ह्रस्वत्वे [21.22] **मा मीमिले** [21.23] **मा मिमीले** इति रूपद्वन्द्वं सिद्धम् । [21.24] **आसीदामे**ति सीदतेर्मवचने सिद्धिः । तथा चिनोतेः सनि *"चेः किर्वा"* [सिद्धहेम. 4।1।36] इति क्यादेशे चिकीष इति स्थिते चिकीषतीति क्विपि *"अतः"* [सिद्धहेम. 4।3।82] इत्यलोपे च चिकीषमाचष्ट इति णिचि, अन्त्यस्वरादिलोपे आशीः - क्याद् इति सिद्धं [21.25] **चिक्याद्** इति । एवं [21.26] **निन्याद्** इत्यपि ।।21।।

अनेन प्रकारेण विषमप्रयोगान् पर्यनुयुज्यमानास्वननुसृतप्र

स्तुतग्रन्थशरणयः कथमिव(मपि) प्रतिवचनप्रपीनसामर्थ्यभाजो भवेयुस्तदिति विदित्वा एतदनुसारि चारुचेतोभिश्चेतो विधेयमित्यलं प्रसङ्गेन ।

अकारि श्रीसिद्धहेमतन्त्रविभ्रमवृत्तिका स्वपरानुग्रहकृते श्री**जिनप्रभसूरिणा** ।

ग्रन्थाग्रं सूत्रवृत्तिश्लोक 196 ।।

**।। समाप्त ।।**

# ॥ परिशिष्ट ॥

# (1) श्रीहैमविभ्रम-मूलग्रन्थः

## ।। श्रीहैमविभ्रमः ।।

कस्य धातोस्तिवादीनाम् एकस्मिन् प्रत्यये स्फुटम् ।
परस्परविरुद्धानि रूपाणि स्युस्त्रयोदश ॥१॥

अग्निभ्यः पार्थिवेभ्यश्च प्रथमान्तं पदद्वयम् ।
एषेति नैतदाबन्तं श्वानस्येति च साधुता ॥२॥

भवेतामिति शब्दोऽयं बहुत्वे वर्तते कथम् ?
यागः षष्ठीसमासः स्यात्पञ्चमी पर्वतान्न तु ॥३॥

पञ्चड्ढलानि साधुत्वं कथं याति च लक्षणात् ।
मुनीनामिति नो षष्ठी त्याद्यन्तं चाश्व इत्यपि ॥४॥

अष्टाविति कथं द्वित्वं राजेभ्य इति साधुता ।
तेनेत्येतत्त्याद्यन्तं स्यादत्याद्यन्तं भवेदिति ॥५॥

हस्तौ द्विवचनं नेदं शोभनेष्वित्यसप्तमी ।
क्षीरस्येति न षष्ठीयं त्याद्यन्तं वायुरित्यपि ॥६॥

दधिस्येति कथं साधु मधुस्येति तथा परम् ।
केनेत्येतदटान्तं स्यादपापा इत्यसुप्तथा ॥७॥

एतेषां कथमेकत्वं वनानि ब्राह्मणैरमी ।
वृक्षाः पचन्ति येषां यान् वायुभ्यः पार्थिवाः सुराः ॥८॥

शेषाणि पूर्वाणि समान्यजानां फलानि मूलानि हलान्यगूनाम् ।
अभ्राणि नीलानि दलान्यतस्यः शूलानि कूलानि तटान्यपापाः ॥९॥

सुखानि शीलानि नखान्यसास्नाः खलानि पापानि बलान्यचर्चाः ।
पुराणि वर्षाणि मठान्यमीनाः घनानि सर्वाणि बिलान्यपां च ॥१०॥

अधीये नोपसृष्टस्य शक्यतीत्यस्य साधुता ।
जागर्तीति न जागर्तेरुच्यतीत्यस्य साधुता ॥११॥

अस्यन्निति न शत्रन्तं व्याघ्रा इत्यस्य चैकता ।
बहुत्वं च तथैतेषामसुर्मेषारूरेव च ॥१२॥

एतानि न स्याद्यन्तानि यस्य तस्याश्वमस्य च ।
शेलुर्बिभीतको वेणुः पञ्चेते स्म ऋणानि च ॥१३॥

एकस्य कस्य धातोः स्यात्त्यादौ रूपचतुष्टयम् ।
पर्वाणि पर्वतं पर्व पर्वतोऽपूर्वमेव च ॥१४॥

अशोकोऽनौस्तथा वातादश्रीणामरुणोऽवनम् ।
वनानि स्वोऽखिलं यानि शुभानि चरणानि च ॥१५॥

सास्नाया अकृशोऽताता अमर्मा अवटोऽनृणाम् ।
वेष रेफ रवेऽपेपेरदोधूर्तानिलः कुतः ॥१६॥

अरये नभसे पयसे वयसे लोकेऽनसे गवे ।
वृक्षेऽहयोऽकवेऽयसे रेखे लेखे रजसि रेजेऽलिट् ॥१७॥

अद्यौर्न नञ्समासोऽयं सर्वेषामिति चैकता ।
अन्येषामपरेषां च केषां कासां तथा दश ॥१८॥

अगारं द्वे पदे स्यातां प्रथमान्तं शुनस्तथा ।
कर्तृरूपे कथं स्यातां दीयते धीयते तथा ॥१९॥

त्याद्यन्तमालयं प्रोक्तमसमस्तमजापयः ।
अन्यान्यश्वालयं चैव ह्यनालयमशालयः ॥२०॥

अव्याधयोऽसमस्तं स्याद्येयेषाञ्चक्रिरे पदम् ।
अक्षेपयस्तथा चान्यदक्षेवयममीवयम् ॥२१॥

# (2) मूलश्लोकानामकाराद्यनुक्रमणिका


| श्लोक | पृष्ठ |
|---|---|
| अगारं द्वे पदे स्याताम् | 77 |
| अग्निभ्यः पार्थिवेभ्यश्च | 11 |
| अद्यौर्ननञ् समासोऽयम् | 74 |
| अधीये नोपसृष्टस्य | 44 |
| अरये नभसे पयसे | 68 |
| अव्याधयोऽसमस्तं स्याद् | 85 |
| अशोकोऽनौस्तथा वाताद् | 59 |
| अष्टाविति कथं द्वित्वम् | 18 |
| अस्यन्निति न शत्रन्तम् | 47 |
| एकस्य कस्य धातोः स्यात् | 56 |
| एतानि न स्याद्यन्तानि | 52 |
| एतेषां कथमेकत्वम् | 28 |
| कस्य धातोस्तिवादीनाम् | 1 |
| त्याद्यन्तमालयं प्रोक्तम् | 20 |
| दधिस्येति कथं साधु | 25 |
| पञ्चड्ढलानि साधुत्वम् | 17 |

भवेतामिति शब्दोऽयम् .................................................. 14
शेषाणि पूर्वाणि समान्यजानां.................................................. 33
सास्नाया अकृशोऽताता.................................................. 63
सुखानि शीलानि नखान्यसास्ना.................................................. 38
हस्तौ द्विवचनं नेदम् .................................................. 24

❁ ❁ ❁

## (3) श्रीगुणचन्द्रसूरिविरचिततत्त्वप्रकाशिका-टीकागत साक्षिपाठानामकारादिक्रमः

| श्लोक | पृष्ठ |
|---|---|
| यूथानि गूथानि घृतानि रात्रिः | 21 |
| स्वेदं समुद्वहति | 92 |

❁ ❁ ❁

## (4) श्रीजिनप्रभसूरिविहितवृत्तिगत साक्षिपाठानामकारादिक्रमः

| श्लोक | पृष्ठ |
|---|---|
| यूतानि गूथानि घृतानि रात्रिः.................................................. | 37 |

❁ ❁ ❁

# (5) ग्रन्थगतप्रयोगानामकारादिक्रमः



| प्रयोग | गुण॰टीका | पृष्ठ | जिन॰टीका | पृष्ठ |
|---|---|---|---|---|
| अकवे | १७.२० | 70 | 17.16 | 73 |
| अकृशः | १६.२ | 63 | 16.2 | 66 |
| अक्षरम् | १४.१७ | 58 | 14.14 | 59 |
| अक्षेपयः | २१.३ | 86 | 21.3 | 93 |
| अक्षेवयम् | २१.१७ | 89 | 21.5 | 93 |
| अखिलम् | १५.९ | 61 | 15.9 | 62 |
| अगारम् | १९.१ | 77 | 19.1 | 78 |
| अगूनाम् | ९.८ | 34 | 9.8 | 36 |
| अग्निभ्यः | २.१.१/२.१.२ | 11 | 2.1.1/2.1.2 | 13 |
| अचकलाकद् | १.२४ | 6 | - | - |
| अचर्चाः | १०.८ | 40 | 10.8 | 43 |
| अजर्घाः | ७.७ | 27 | - | - |
| अजागाः | ५.२० | 22 | 9.31 | 37 |
| अजाघटम् | २१.४ | 86 | 21.4 | 93 |
| अजानाम् | ९.४ | 33 | 9.4 | 36 |
| अजापयः | २०.३.१/ २०.३.२ | 79 | 20.3.1/20.3.2 | 84 |
| अजिनानि | १७.२६ | 72 | 17.22 | 74 |

| प्रयोग | गुण०टीका | पृष्ठ | जिन०टीका | पृष्ठ |
|---|---|---|---|---|
| अजिह्वायकद् | १.३२.१/ १.३२.२ | 9 | - | - |
| अतस्यः | ९.१२ | 35 | 9.12 | 36 |
| अताताः | १६.३ | 63 | 16.3 | 66 |
| अति, अतः, अन्ति, असि, अथः, अथ, आमि, आवः, आमः | २१.८ | 87 | 21.12 | 94 |
| अतृणः | १४.१३ | 56 | 14.10 | 59 |
| अदानि | ५.१९ | 22 | 9.30 | 37 |
| अदिग्ध | २०.१० | 80 | - | - |
| अदुः | २०.१२ | 81 | - | - |
| अदुग्ध | २०.९ | 80 | - | - |
| अदोधूर्त | १६.११ | 65 | 16.11 | 67 |
| अद्यौः | १८.१ | 74 | 18.1 | 76 |
| अधिक्षत | २०.८ | 80 | - | - |
| अधीये | ११.१ | 44 | 11.1 | 46 |
| अधुक्षत | २०.७ | 80 | - | - |
| अध्यायः | १४.१२ | 57 | 14.9 | 59 |
| अनलः | १४.१६ | 58 | 14.13 | 59 |
| अनसे | १७.१६ | 70 | 17.12 | 73 |

| प्रयोग | गुण॰टीका | पृष्ठ | जिन॰टीका | पृष्ठ |
|---|---|---|---|---|
| अनानाः | ७.९ | 27 | - | - |
| अनालयम् | २०.२१ | 83 | 20.8 | 84 |
| अनिलः | १६.१२ | 66 | 16.12 | 68 |
| अनुजगृहे | १२.८ | 50 | 12.8 | 52 |
| अनृणाम् | १६.६ | 64 | 16.6 | 67 |
| अनौः | १५.२ | 59 | 15.2 | 62 |
| अन्येषाम् | १८.५ | 75 | 18.5 | 76 |
| अपरेषाम् | १८.६ | 75 | 18.6 | 76 |
| अपापाः | ७.६ | 26 | 7.4 | 28 |
| अपापाः | ९.१६ | 35 | 9.16 | 36 |
| अपाम् | १०.१६ | 42 | 10.16 | 44 |
| अपास्पाः | ७.८ | 27 | - | - |
| अपुः | २०.११.१/ २०.११.२ | 81 | - | - |
| अपूर्वम् | १४.५ | 56 | - | - |
| अपेपेः | १६.१० | 65 | 16.10 | 67 |
| अभ्राणि | ९.९ | 34 | 9.9 | 36 |
| अमर्माः | १६.४ | 64 | 16.4 | 67 |
| अमी | ८.३ | 28 | 8.3 | 32 |
| अमीनाः | १०.१२ | 41 | 10.12 | 43 |

| प्रयोग | गुण०टीका | पृष्ठ | जिन०टीका | पृष्ठ |
|---|---|---|---|---|
| अमीवयम् | २१.१८ | 89 | 21.6 | 93 |
| अयसे | १७.२१ | 71 | 17.17 | 73 |
| अरये | १७.१ | 68 | 17.1 | 72 |
| अराराः | ५.२१ | 23 | 9.32 | 37 |
| अरिक्षः | २०.१५ | 82 | - | - |
| अरिख्यः | २०.१८ | 83 | - | - |
| अरुः | १२.५ | 49 | 12.5 | 51 |
| अरुक्षः | २०.१४ | 82 | - | - |
| अरुणः | १५.५ | 60 | 15.5 | 62 |
| अरूख्यः | २०.१७ | 83 | - | - |
| अर्वन् | २१.१४ | 89 | 21.18 | 94 |
| अलिक्षः | २०.१३ | 82 | 20.6 | 84 |
| अलिख्यः | २०.१६ | 83 | - | - |
| अव | २०.५.१/ २०.५.२ | 80 | - | - |
| अवटः | १६.५ | 64 | 16.5 | 67 |
| अवनम् | १५.६ | 60 | 15.6 | 62 |
| अवसि | २०.४.१/ २०.४.२ | 79 | - | - |
| अवस्थाः | १८.४ | 75 | 18.4 | 76 |

| प्रयोग | गुण०टीका | पृष्ठ | जिन०टीका | पृष्ठ |
|---|---|---|---|---|
| अवागरिढ्वम् | १.५ | 2 | 1.5 | 11 |
| अवागरिध्वम् | १.१ | 2 | 1.2 | 10 |
| अवागरीढ्वम् | १.६ | 2 | 1.6 | 11 |
| अवागरीध्वम् | १.२ | 2 | 1.1 | 10 |
| अवागलिढ्वम् | १.७ | 2 | 1.7 | 11 |
| अवागलिध्वम् | १.३ | 2 | 1.3 | 10 |
| अवागलीढ्वम् | १.८ | 2 | 1.8 | 11 |
| अवागलीध्वम् | १.४ | 2 | 1.4 | 10 |
| अवागारिढ्वम् | १.९ | 2 | 1.11 | 11 |
| अवागारिध्वम् | १.११ | 2 | 1.9 | 11 |
| अवागालिढ्वम् | १.१ | 2 | 1.12 | 11 |
| अवागालिध्वम् | १.१२ | 3 | 1.1 | 11 |
| अवागीर्ढ्वम् | १.१३ | 3 | 1.13 | 11 |
| अविषः | २०.१९.१/ २०.१९.२ | 83 | 20.5 | 84 |
| अव्ययम् | १२.१६ | 51 | 12.15 | 52 |
| अव्याधयः | २१.१ | 85 | 21.1 | 93 |
| अशालयः | २०.२२ | 84 | 20.9 | 84 |
| अशुभम् | २०.६.१/ २०.६.२ | 80 | 20.4 | 84 |

| प्रयोग | गुण०टीका | पृष्ठ | जिन०टीका | पृष्ठ |
|---|---|---|---|---|
| अशोकः | १५.१ | 59 | 15.1 | 62 |
| अश्रीणाम् | १५.४ | 60 | 15.4 | 62 |
| अश्वः | ४.३ | 18 | 4.3 | 18 |
| अश्वम् | १३.५ | 52 | 13.4 | 55 |
| अश्वालयम् | २०.२० | 83 | 20.7 | 84 |
| अष्टौ | ५.१ | 19 | 5.1 | 23 |
| असास्नाः | १०.४ | 39 | 10.4 | 43 |
| असीदाम | १.१९ | 4 | - | - |
| असुः | १२.३ | 48 | 12.3 | 51 |
| अस्य | १३.६ | 53 | 13.5 | 55 |
| अस्यन् | १२.१ | 47 | 12.1 | 51 |
| अस्याः | १३.१३ | 55 | 13.12 | 56 |
| अहयः | १७.१९ | 70 | 17.15 | 73 |
| आगमः | १२.७ | 49 | 12.7 | 52 |
| आदित्य | १४.१५ | 58 | 14.12 | 59 |
| आपः | २१.६.१/ २१.६.२ | 87 | 21.8 | 94 |
| आपत् | २१.५.१/ २१.५.२ | 87 | 21.7 | 94 |
| आलयम् | २०.१ | 78 | 20.1 | 84 |

| प्रयोग | गुण०टीका | पृष्ठ | जिन०टीका | पृष्ठ |
|---|---|---|---|---|
| आलये | २०.२ | 78 | 20.2 | 84 |
| आवे | १७.२७ | 72 | 17.23 | 74 |
| आसीदामः | - | - | 21.24 | 67 |
| आहसि | १.२९ | 8 | - | - |
| उक्षन् | २१.११ | 88 | 21.15 | 94 |
| उच्यति | ११.४ | 46 | 11.4 | 47 |
| उर्वन् | २१.१६ | 89 | - | - |
| ऋणानि | १३.१२ | 54 | 13.11 | 56 |
| एषा | २.३ | 13 | 2.3 | 14 |
| कति, कतः, कन्ति, कसि, कथः, कथ, कामि, कावः, कामः | २१.७ | 87 | 21.12 | 94 |
| कस्याः | १३.१७ | 55 | 13.14 | 56 |
| कानि | २१.९ | 88 | 21.13 | 94 |
| कासाम् | १८.८ | 76 | 18.8 | 76 |
| कुण्डे | १७.६ | 69 | 17.6 | 73 |
| कुतः | १६.१३ | 66 | 16.13 | 68 |
| कूलानि | ९.१४ | 35 | 9.14 | 36 |
| केन | ७.५ | 26 | 7.3 | 28 |
| केषाम् | १८.७ | 75 | 18.7 | 76 |

| प्रयोग | गुण०टीका | पृष्ठ | जिन०टीका | पृष्ठ |
|---|---|---|---|---|
| क्षीरस्य | ६.३ | 24 | 6.3 | 25 |
| क्षीराणि | ५.१ | 19 | 9.21 | 37 |
| खण्डे | १७.१३ | 69 | 17.11 | 73 |
| खलानि | १०.५ | 39 | 10.5 | 43 |
| गवे | १७.१७ | 70 | 17.13 | 73 |
| गूथानि | ५.७ | 21 | 9.18 | 37 |
| घनानि | १०.१३ | 41 | 10.13.1/ 10.13.2 | 44 |
| घृतानि | ५.८ | 21 | 9.19 | 37 |
| चक्र | १८.३ | 75 | 18.3 | 76 |
| चण्डे | १७.११ | 69 | 17.10 | 73 |
| चन्द्र | १४.१४ | 58 | 14.11 | 59 |
| चिक्यात् | १.२०/१.२३ | 5 | 21.25 | 95 |
| चिच्यात् | १.२२ | 6 | - | - |
| जगाम नगरे | १.१४ | 3 | 10.18 | 44 |
| जलानि | १४.६ | 57 | 14.1 | 58 |
| जस्य | १३.४ | 55 | - | - |
| जागर्ति | ११.३ | 45 | 11.3 | 47 |
| जाये | १७.२८ | 72 | 17.24 | 74 |
| टण्टीः | १.३१ | 9 | - | - |

| प्रयोग | गुण०टीका | पृष्ठ | जिन०टीका | पृष्ठ |
|---|---|---|---|---|
| तटानि | ९.१५ | 35 | 9.15 | 36 |
| तण्डे | १७.१२ | 69 | - | - |
| तस्य | १३.२ | 52 | 13.2 | 55 |
| तस्याः | १३.१५ | 55 | - | - |
| तुण्डे | १७.१० | 69 | 17.9 | 73 |
| तृणानि | ५.१५ | 22 | 9.27 | 37 |
| तेन | ५.३ | 19 | 5.3 | 23 |
| दधिस्य | ७.३ | 26 | 7.1.1/7.1.2 | 28 |
| दध्यस्य | ७.१ | 25 | - | - |
| दलानि | ९.११ | 34 | 9.11 | 36 |
| दश | १८.९ | 76 | 18.9 | 77 |
| दस्य | १३.१ | 52 | 13.3 | 55 |
| दस्याः | १३.१६ | 55 | - | - |
| दिवानि | ५.१२ | 22 | 9.25 | 37 |
| दीयते | १९.३ | 77 | 19.3 | 78 |
| देवताम् | २१.२२ | 90 | 21.11 | 94 |
| देवते | २१.२० | 89 | 21.1 | 94 |
| धीयते | १९.४ | 77 | 19.4 | 78 |
| नकिरचाकङ्किष्ठाः | १.२७ | 7 | - | - |
| नकिरटाटङ्किष्ठाः | १.२८ | 7 | - | - |

| प्रयोग | गुण०टीका | पृष्ठ | जिन०टीका | पृष्ठ |
|---|---|---|---|---|
| नखानि | १०.३ | 39 | 10.3 | 43 |
| नजति | १.३० | 8 | - | - |
| नट | १२.१३ | 51 | 12.13 | 52 |
| नभसे | १७.२ | 68 | 17.2 | 72 |
| नस्याद् | २१.२१ | 90 | - | - |
| निन्यात् | १.२१ | 5 | 21.26 | 95 |
| नीलानि | ९.१० | 34 | 9.10 | 36 |
| पचन्ति | ८.५ | 30 | 8.5 | 32 |
| पञ्चड्ढलानि | ४.१ | 17 | 4.1 | 18 |
| पञ्चेते | १३.१० | 54 | 13.9 | 55 |
| पट | १२.१० | 51 | 12.11 | 52 |
| पयसे | १७.३ | 68 | 17.3 | 73 |
| पर्व | १४.३ | 58 | - | - |
| पर्वतः | १२.६ | 49 | 12.6 | 52 |
| पर्वतः | १४.४ | 56 | - | - |
| पर्वतम् | १४.२ | 56 | - | - |
| पर्वताद् | ३.३.१/३.३.२ | 16 | 3.3.1/3.3.2 | 17 |
| पर्वन् | २१.१३ | 89 | 21.17 | 94 |
| पर्वाणि | १४.१ | 56 | - | - |
| पापानि | १०.६ | 39 | 10.6 | 43 |

| प्रयोग | गुण०टीका | पृष्ठ | जिन०टीका | पृष्ठ |
|---|---|---|---|---|
| पार्थिवाः | ८.९ | 31 | 8.9 | 32 |
| पार्थिवेभ्यः | २.२.१/२.२.२ | 12 | 2.2 | 14 |
| पिण्डे | १७.८ | 69 | 17.7 | 73 |
| पुराणि | १०.९ | 40 | 10.9 | 43 |
| पूर्वाणि | ९.२ | 33 | 9.2 | 35 |
| पूषन् | २१.१५ | 89 | 21.19 | 94 |
| प्रातः | १४.१० | 57 | 14.5 | 59 |
| फलानि | ९.५ | 33 | 9.5 | 36 |
| बलानि | १०.७ | 40 | 10.7 | 43 |
| बिभीतकः | १३.८ | 53 | 13.7 | 55 |
| बिलानि | १०.१५ | 42 | 10.15 | 44 |
| ब्राह्मणैः | ८.२ | 28 | 8.2 | 32 |
| भवति | १०.१७ | 42 | 10.17 | 44 |
| भवेताम् | ३.१ | 14 | 3.1 | 16 |
| भवेद् | ५.२२ | 23 | 5.4 | 23 |
| मठ | १२.११ | 51 | - | - |
| मठानि | १०.११ | 40 | 10.11 | 43 |
| मद | १२.१२ | 51 | 12.12 | 52 |
| मधुस्य | ७.४ | 26 | 7.2.1/7.2.2 | 28 |
| मध्वस्य | ७.२ | 25 | - | - |

| प्रयोग | गुण०टीका | पृष्ठ | जिन०टीका | पृष्ठ |
|---|---|---|---|---|
| मम | ५.५ | 20 | 10.20 | 44 |
| मा मिमीमाम | १.१६ | 4 | 21.21 | 95 |
| मा मिमीले | १.१८ | 4 | 21.23 | 95 |
| मा मीमिले | १.१७ | 4 | 21.22 | 95 |
| मा रिरेकाम | १.१५ | 4 | 21.20 | 95 |
| मुण्डे | १७.९ | 69 | 17.8 | 73 |
| मुनीनाम् | ४.२ | 18 | 4.2 | 18 |
| मूढानि | ५.१८ | 22 | 9.29 | 37 |
| मूलानि | ९.६ | 33 | 9.6 | 36 |
| मेष | १२.४ | 48 | 12.4 | 51 |
| यस्य | १३.१ | 52 | 13.1 | 55 |
| यस्याः | १३.१४ | 55 | 13.13 | 56 |
| यागः | ३.२.१/३.२.२/ ३.२.३ | 15 | 3.2.1/3.2.2 | 16 |
| यानि | १५.१० | 61 | 15.10 | 62 |
| यान् | ८.७ | 30 | 8.7 | 32 |
| यामः | १७.१४ | 69 | 14.8 | 59 |
| युवन् | २१.१२ | 89 | 21.16 | 94 |
| यूथानि | ५.६.१/५.६.२ | 21 | 9.17.1/9.17.2 | 37 |
| येयेषाञ्चक्रिरे | २१.२ | 85 | 21.2 | 93 |

| प्रयोग | गुण०टीका | पृष्ठ | जिन०टीका | पृष्ठ |
|---|---|---|---|---|
| येषाम् | ८.६ | 30 | 8.6 | 32 |
| रजसि | १७.२४ | 71 | 17.20 | 73 |
| रणानि | १५.१२ | 62 | 15.12 | 63 |
| रवे | १६.९ | 65 | 16.9 | 67 |
| राजगृह | - | - | 12.10 | 52 |
| राजन् | २१.१० | 88 | 21.14 | 94 |
| राजसे | १२.९ | 55 | 12.9 | 52 |
| राजेभ्यः | ५.२ | 19 | 5.2 | 23 |
| रात्रीः | ५.९ | 21 | 9.20 | 37 |
| रामः | १७.१५ | 69 | 14.7 | 59 |
| रेखे | १७.२२ | 71 | 17.18 | 73 |
| रेजे | १७.२५ | 71 | 17.21 | 73 |
| रेफ | १६.८ | 65 | 16.8 | 67 |
| लेखे | १७.२३ | 71 | 17.19 | 73 |
| लोके | १७.५ | 68 | 17.5 | 73 |
| वकीमः | १.२६ | 7 | - | - |
| वनानि | ८.१ | 28 | 8.1 | 32 |
| वनानि | १५.७ | 61 | 15.7 | 62 |
| वयसे | १७.४ | 68 | 17.4 | 73 |
| वर्षाणि | १०.१० | 40 | 10.10 | 43 |

| प्रयोग | गुण०टीका | पृष्ठ | जिन०टीका | पृष्ठ |
|---|---|---|---|---|
| वात | १४.९ | 57 | 14.4 | 58 |
| वातः | १४.७ | 57 | 14.3 | 58 |
| वातम् | १४.८ | 57 | 14.2 | 58 |
| वाताद् | १५.३ | 60 | 15.3 | 62 |
| वायुः | ६.४ | 25 | 6.4 | 25 |
| वायुभ्यः | ८.८ | 31 | 8.8 | 32 |
| वृक्षाः | ८.४ | 29 | 8.4 | 32 |
| वृक्षे | १७.१८ | 70 | 17.14 | 73 |
| वृक्षेण | ५.४ | 20 | 10.19 | 44 |
| वृत्तानि | ५.११ | 22 | 9.24 | 37 |
| वेणुः | १३.९ | 54 | 13.8 | 55 |
| वेष | १६.७ | 65 | 16.7.1/16.7.2 | 67 |
| व्याघ्राः | १२.२ | 48 | 12.2 | 51 |
| शक्यति | ११.२ | 45 | 11.2 | 46 |
| शीलानि | १०.२ | 39 | 10.2 | 43 |
| शुनः | १९.२ | 77 | 19.2 | 78 |
| शुभानि | १५.११ | 61 | 15.11 | 62 |
| शूराणि | ५.१४ | 22 | 9.22 | 37 |
| शूलानि | ९.१३ | 35 | 9.13 | 36 |
| शेलुः | १३.७ | 53 | 13.6 | 55 |

| प्रयोग | गुण॰टीका | पृष्ठ | जिन॰टीका | पृष्ठ |
|---|---|---|---|---|
| शेषाणि | ९.१ | 33 | 9.1 | 35 |
| शेषे | २१.१९ | 89 | 21.9 | 94 |
| शोभनेषु | ६.२ | 24 | 6.2 | 25 |
| श्यामः | १४.११ | 57 | 14.6 | 59 |
| श्वानस्य | २.४ | 13 | 2.4.1/2.4.2 | 14 |
| समानि | ९.३ | 33 | 9.3.1/9.3.2 | 36 |
| सर्वाणि | १०.१४ | 41 | 10.14.1/ 10.14.2 | 44 |
| सर्वेषाम् | १८.2 | 74 | 18.2 | 76 |
| सास्नायाः | १६.१ | 63 | 16.1 | 66 |
| सुखानि | ५.१३ | 22 | 9.26 | 37 |
| सुखानि | १०.१.१/१०.१.२/ १०.१.३/१०.१.४ | 38 | 10.1.1/10.1.2/ 10.1.3 | 42 |
| सुराः | ८.१० | 31 | 8.1 | 32 |
| सूत्राणि | ५.१७ | 22 | 9.23 | 37 |
| स्थूलानि | ५.१६ | 22 | 9.28 | 37 |
| स्मः | १३.११ | 54 | 13.10 | 55 |
| स्वः | १५.८ | 61 | 15.8 | 62 |
| हर | १२.१४ | 51 | 12.14 | 52 |
| हरिता | १.२५ | 6 | - | - |

| प्रयोग | गुण०टीका | पृष्ठ | जिन०टीका | पृष्ठ |
|---|---|---|---|---|
| हरे | १२.१५ | 51 | - | - |
| हलानि | ९.7 | 33 | 9.7 | 36 |
| हस्तौ | ६.१ | 24 | 6.1 | 25 |
| हुण्डे | १७.७ | 69 | - | - |

## (6) श्रीमुनिसुन्दरसूरि-विरचित-त्रैविद्यगोष्ठी-ग्रन्थांशस्यास्य च ग्रन्थस्य समानता

... अतो युक्तिमत्येव सम्प्रत्यावयोरेषा शास्त्रगोष्ठी। ततो विधीयते क्षणम्। परं किं सा अक्षुण्णलक्षणानुगामिन्युत साहित्यसौहित्यानुसारिणी कर्कशतर्कानुयायिनी वा भवद्भ्यो रोचते। लक्षणानुगामिनी चेत् तदा सम्प्रति सकलेष्वपि लक्षणेषु श्रीसिद्धहेमचन्द्राभिधानमेव प्रधानतया वावदति तद्विदुराः । अतस्तदाश्रित्य प्रेर्यते किञ्चित् ।

वावत्थ भोः ! **'अधीये'** इति त्याद्यन्तं *इंङ्क् अध्ययने* [सिद्ध. धातु. ११०४] [इति] धातुमन्तरेणापि कथं सिद्ध्येत् ? सिद्ध्यत्येव भोः धीङ्च् अनादरे [सिद्ध. धातु. १२४५] हस्तन्या ए *दिवादेः श्ये* [सिद्धहेम. ३।४।७२] इति सुस्पष्टमेव । तथा *उचच् समवाये* [सिद्ध. धातु. ११७६] इत्यनेन **'उच्यति'** इति। *घ्रां गन्धोपादाने* [सिद्ध. धातु. ३] इत्यनेन **'व्याघ्राः'** इति। तथा **'जागर्त्ति'** इति *जागृक् निद्राक्षये* [सिद्ध. धातु. १०९३] इत्यनेन । तथा *गॄत् निगरणे* [सिद्ध. धातु. १३३५] गर्हितार्थे यङि तल्लुपि द्वित्वे *ह्रस्वः* [सिद्धहेम. ४।१।३९] इति ह्रस्वे, *ऋतोऽत्* [सिद्धहेम. ४।१।४८] इति ऋकारस्य *आगुण०* [सिद्धहेम. ४।१।४८] इत्याकारे, तिवि गुणे चैवमपि सिद्ध्यतीत्यादि त्याद्यन्तानि विचित्राण्यपि चित्रकराणि सेषिद्ध्यन्ते, कियन्ति वक्तुं शक्यानि ।

तथा पञ्च षष् इति व्यवस्थापिते पञ्च च षट् चेति विग्रहे *प्रमाणी०* [सिद्धहेम. ७।३।१२८] इति डे, अन्त्यस्वरादिलोपे, पञ्चषानाचष्टे

इति णिज् प्रत्यये, *डित्यन्त्यस्वारादेः* [सिद्धहेम. २।१।११४] इत्यन्त्य-स्वरादिलोपे क्रियार्थत्वाद् धातुत्वे, क्विपि, अग्रे हलशब्दे पञ्चषां हलानीति समासे *धुटस्तृतीयः* [सिद्धहेम. २।१।७६] इति षो डत्वे, *ततो हश्चतुर्थः* [सिद्धहेम. १।३।३] इति ढत्वे '**पञ्चड्ढलानि**' इति सिद्धिमध्यास्ते ।

तथोच्यतां विचार्य क्षणं स्वचेतसा कस्य धातोः परस्परासम्पृक्तानि त्रयोदशरूपाणि सेषिद्ध्येरन् । वावच्मो वा गिरतेरवपूर्वाद् *अवात्* [सिद्धहेम. ३।३।६७] इत्यात्मनेपदे, अद्यतनी-ध्वमि, सिचि, *इट् सिजाशिषोरात्मने* [सिद्धहेम. ४।४।३६] इतीडागमे, '*सो धि वा*' [सिद्धहेम. ४।३।७२] इति सिचो लोपेऽडागमे चोपसर्गाकारेण दीर्घत्वे, *नामिनो गुणो०* [सिद्धहेम ४।३।१] इति गुणो, *वॄतो नवा०* [सिद्धहेम. ४।४।३५] इति पक्षे इटो दीर्घत्वे, **'अवागरिध्वम्'** [१], **'अवागरीध्वम्'** [२], *नवा स्वरे* [सिद्धहेम. २।३।१०२] इति लत्वे, **'अवागलिध्वम्'** [३], **'अवागलीध्वम्'** [४], *हान्तस्थाञ्जीड्भ्यां वा* [सिद्धहेम. २।१।८१] इति पक्षे ढत्वे, **'अवागरिढ्वम्'** [५], **'अवागरीढ्वम्'** [६], **'अवागलिढ्वम्'** [७], **अवागलीढ्वम्** [८], तथा *स्वरग्रह०* [सिद्धहेम. ३।४।६९] इत्यादिना ञिटि, *नामिनोऽकलिहलेः* [सिद्धहेम. ४।३।५१] इति वृद्धौ **'अवागारिढ्वम्'** [९], **'अवागारिध्वम्'** [१०], **'अवागालिढ्वम्'** [११], **'अवागालिध्वम्'** [१२], इडभावपक्षे च *ॠतां क्ङितीर्* [सिद्धहेम. ४।४।११६] इतीरादेशे, *भ्वादेर्नामिनः* [सिद्धहेम. २।१।६३] इत्यादिनोपान्त्यदीर्घत्वे, *नाम्यन्त०* [सिद्धहेम. २।१।८०] इत्यादिना

ढत्वे, **'अवागीर्ढ्वम्'** [१३] इति सुसङ्गतान्येवेति ।

तथा गमिप्रकृतेरङ्गाकृतिं विनापि **'जगाम'** इति रूपं निरूप्यते तथाहि – जगिच्छान्दसः, जगिमाचष्टे णिजि प्रत्यये *नामिनोऽकलि०* [सिद्धहेम. ४।३।५१] इति वृद्धौ, अन्त्यस्वरादिलोपे जगयतीति क्विपि, तल्लोपे *णेरनिटि* [सिद्धहेम. ४।३।८३] इति णिज् लोपे जग् इति सिद्धम् । पुनर्जगिवाचरतीति कर्तुः क्विपि, तस्य लोपे, क्रियार्थत्वाद् धातुत्वे, पञ्चम्या मवि, *कर्तरि०* [सिद्धहेम. ३।४।७१] इति शवि, **'जगाम'** इति रूपं प्रासिद्ध्यत् ।

**'मा रिरेकाम'** इति *रेकृङ् शङ्कायाम्* [सिद्ध. धातु. ६१६] माङ्पूर्वके, रेकमानं प्रयुङ्क्ते, णिगि, अद्यतनी-मप्रत्यये, *णिश्री०* [सिद्धहेम. ३।४।५८] इत्यादिना ङे, *आद्योंऽश०* [सिद्धहेम. ४।१।२] [इति] द्वित्वे, पूर्वस्य ह्रस्वे, णिग्लोपे, *मव्यस्याः* [सिद्धहेम. ४।२।११३] इत्यकारस्याकारे **'मा रिरेकाम'** इति सिद्धिमध्यास्ते ।

एवं **'मा मिमीमाम'** इति नवरं *अम द्रम हम्म मीमृ गमृ गतौ* [सिद्धधातु. ३९२-३९६] इति धातुः ।

इत्यादिमनोविनोदकाः क्रियाप्रयोगा बहवोऽपि बोभवति ।

तथा मासशब्दात् भ्यामि *मासनिशा०* [सिद्धहेम. २।१।१००] इति पक्षेऽकारलोपे, *असिद्धं बहिरङ्ग०* [न्या. सं. १।२०] इत्यकारस्थानित्वेन, *सो रुः* [सिद्धहेम. २।१।७२] इति सस्य रुत्वे, *धुटस्तृतीयः* [सिद्धहेम. २।१।७६] इति दत्वे तु न्यायानित्यत्वे **'माद्भ्याम्'** इति मन्यते **भाष्यकृत् । दुर्गस्तु 'माद्भ्याम्'** इति ।

**'दधिसेग्'** इति *गतिकारकङस्युक्तानां विभक्त्युपपत्तेः प्रागेव समासः* [न्या.सं. २।३१] इति न्यायात् सेगिति पदेन समासस्तदा *वृत्यन्तोऽशषे* [सिद्धहेम. १।१।२५] इति सस्य षत्वे विधातव्येऽपि पदत्वाभावात् पदादित्वाभावात् षत्वं प्राप्नोति । सत्यं, तदापि न भवति विधिव्याख्यानाद् यतो *नामसिद्०* [सिद्धहेम. १।१।२१] इत्यादिनियमेन निवृत्ता पदसंज्ञा, *वृत्यन्तोऽशषे* [सिद्धहेम. १।१।२५] इत्यत्र सस्य तु षत्वे पदमेवेति व्याख्यानात्, विधीयते तर्हि दीर्घवपुषः इत्यादौ षत्वं, यतः षत्वे कर्तव्ये पदत्वं, पदान्तत्वाच्च षत्वं न स्यात्तन्न, नञा निर्दिष्टस्यानित्यत्वात् । एतदपि कुतो निश्चीयते *व्याप्तौ स्सात्* [सिद्धहेम. ७।२।१३०] इत्यत्र द्विःसकारपाठात्, स हि निर्दिष्टस्यानित्यत्वात् प्राप्तस्य षत्वस्य निषेधार्थम् ।

एतच्च व्याकरणं क्वचित्प्रचूरतरन्यायविचारैर्दुस्सञ्चरम्, इयं च तेषां दिग् । तथाहि *नित्यादन्तरङ्गम् बलीयः* [न्या. सं. १।५३ ] यथा ज्ञाया ओदनो ज्ञौदनः, तमिच्छति, *अमाव्ययात् क्यन् च* [सिद्धहेम. ३।४।२३] इति क्यन्, ततः सनि अकृतव्यूहत्वात् ज्ञा ओदनीय स इति स्थिते द्वित्वं प्राप्नोति औत्वं च । ततो नित्यत्वात् द्वित्वे प्राप्ते तद् बाधित्वाऽन्तरङ्गत्वाद् औत्वं भवति **'जुज्ञौदनीयिषति'** इति ।

तदेवं लक्षणामृतकल्लोलिनीलहरिमालाप्लवनप्रादुर्भवच्छीतीभावः प्रौढपुण्योपचयलभ्य एवेति यतितव्यं तदाप्तये विबुधधुरीणैः ।

❖ ❖ ❖

**પ.પૂ. નિસ્પૃહશીલ આ.ભ. ગુરુદેવ**

**શ્રી જગચ્ચન્દ્રસૂરીશ્વરજી મહારાજ (ડહેલાવાળા)**

**સૂરિપદપ્રદાન રૌપ્ય મહોત્સવ**

**(વિ.સં. ૨૦૫૫-૨૦૮૦)ના ઉપલક્ષમાં**

**જૈનાચાર્ય શ્રી જગચ્ચન્દ્રસૂરિ-સૂરિપદ રૌપ્યવર્ષ**

**ગ્રન્થપુષ્પમાળાનો શુભારંભ**

## તદન્તર્ગત પ્રકાશિત થનારા ગ્રંથોની યાદી

- સંવેગી પરંપરા કૃતિસંદોહ ૧ થી ૧૦ ભાગ
- શ્રી હૈમવિભ્રમ – (શ્રી ગુણચન્દ્રગણિકૃત તત્ત્વપ્રકાશિકા ટીકા અને શ્રી જિનપ્રભસૂરિકૃત વૃત્તિ સમેત–અનેક હસ્તપ્રતો દ્વારા લિપ્યંતર–સંશોધન–સંપાદન)
- શ્રી દશાશ્રુતસ્કંધ સૂત્ર – શ્રી બ્રહ્મર્ષિકૃત ટીકા (અદ્યાવધિ અપ્રગટ અનેક હસ્તપ્રતો દ્વારા લિપ્યંતર–સંશોધન–સંપાદન)
- શ્રી અન્યયોગવ્યવચ્છેદ દ્વાત્રિંશિકા–અજ્ઞાનકર્તૃક અપ્રગટ અવચૂરિ સહ – (હસ્તપ્ર દ્વારા લિપ્યંતર–સંશોધન–સંપાદન)
- શ્રી પ્રજ્ઞાપના સૂત્ર – સટીક હિન્દી અનુવાદ
- શ્રી દ્વાદશારનયચક્ર – પ્રથમવાર હિન્દી અનુવાદ સવિવવેચન
- પં. શ્રી રૂપવિજયજી મહારાજ કૃત વિમલમંત્રીરાસ (અદ્યાવધિ અપ્રગટ હસ્તપ્રતો દ્વારા લિપ્યંતર–સંશોધન–સંપાદન)
- શ્રી સિદ્ધહેમચન્દ્ર શબ્દાનુશાસન બૃહન્ન્યાસ (અધ્યાય–૩, પાદ–૪નો અદ્યાવધિ અપ્રગટ બૃહન્ન્યાસ)
- સપ્તનયરાસ – ગુજરાતી વિવેચન ભાગ–૧, ૨

- પં. શ્રીરત્નવિજયજી મહારાજ કૃત આર્ય અનાર્ય દેશજ્ઞાપક ચર્ચાપત્ર
- મુહપત્તી ચર્ચાસાર સંગ્રહ
- પં. શ્રી રત્નવિજયજી મહારાજનું જીવનચરિત્ર
- પં. શ્રી ધર્મવિજયજી મહારાજનું જીવનચરિત્ર
- અપ્રતિમપ્રતિભાસંપન્ન પ.પૂ.આ. શ્રી સુરેન્દ્રસૂરીશ્વરજી મહારાજનું સંશોધિત જીવનચરિત્ર
- ક્રિયારત્ન સમુચ્ચય (અનેક હસ્તપ્રતો દ્વારા લિપ્યંતર–સંશોધન–સંપાદન)
- શ્રી આઠદષ્ટિની સજ્ઝાય હિન્દી વિવેચન

## જૈનાચાર્ય શ્રી જગચ્ચન્દ્રસૂરિ-સૂરિપદ રૌપ્યવર્ષ ગ્રન્થપુષ્પમાળા અન્તર્ગત પ્રકાશિત થયેલ ગ્રંથો

- શાંતિસ્તવ – શ્રીલક્ષ્મિવલ્લભગણિ કૃત શાંતિભક્તામરનો પદ્યાનુવાદ (ગુજરાતી)
- Samraditya Mahakatha (English)

# સૂરિરામ પુણ્યસ્મૃતિ ગ્રન્થાવલિ અન્તર્ગત
# પ્રકાશિત પુસ્તકોની યાદી

| | |
|---|---|
| ✤ हेमविभ्रम | संस्कृत |
| ✤ कविकल्पद्रुम | संस्कृत |
| ✤ આર્હત્ દર્શન દિપીકા | ગુજરાતી |
| ✤ ગુરુરામ સંસ્મરણ યાત્રા | ગુજરાતી |
| ✤ ગુરુરામ સંસ્મરણ રાસ | ગુજરાતી |
| ✤ भव आलोचना | हिन्दी |
| ✤ श्री सम्यक्त्व सहित बारव्रत की संक्षिप्त जानकारी | हिन्दी |
| ✤ હિમાલયની ગોદમાં, અષ્ટાપદની શોધમાં | ગુજરાતી |
| ✤ हिमालय की गोद में, अष्टापद की शोध में | हिन्दी |
| ✤ नव्यन्यायभाषा प्रदिप | संस्कृत |
| ✤ Catalogue of Palm-Leaf Manuscripts with Basic Manuscriptologu | अंग्रेजी |
| ✤ अनुयोगद्वार सूत्र सटीक अनुवाद भाग-१-२ | हिन्दी |
| ✤ ભવ આલોચના | ગુજરાતી |
| ✤ બારવ્રત* | ગુજરાતી |
| ✤ અધ્યાત્મ કલ્પદ્રુમ | प्राकृत-ગુજરાતી |
| ✤ જૈનાગમશબ્દસંગ્રહ અર્ધમાગધી ગુજરાતી કોશ | प्राकृत-ગુજરાતી |
| ✤ शक्रस्तव मूल* | संस्कृत |
| ✤ આનંદઘન ચોવીશી સાર્થ | ગુજરાતી |
| ✤ શક્રસ્તવ (ગુજરાતી અનુવાદ સહ) | संस्कृत-ગુજરાતી |
| ✤ श्री श्रीपाल राजा का रास | हिन्दी |
| ✤ તત્ત્વાર્થ સૂત્ર પરિશીલન કાર્યપત્રક-૧ થી ૨૦ | ગુજરાતી |

- તત્ત્વાર્થ સૂત્ર પ્રશ્નબેંક અધ્યાય-૧ થી ૧૦ — ગુજરાતી
- तत्त्वार्थ सूत्र परिशीलन कार्यपत्रक-१ से २० — हिन्दी
- આઠ દૃષ્ટિની સજ્ઝાય કાર્યપત્રક — ગુજરાતી
- Good manners — हिन्दी-English
- શ્રાદ્ધવિધિ પ્રકરણ કાર્યપત્રક — ગુજરાતી

*આ નિશાનીવાળા પુસ્તકો અપ્રાપ્ય છે.

## આચાર્ય શ્રી સુરેન્દ્રસૂરીશ્વરજી જૈન તત્ત્વજ્ઞાનશાળા તરફથી

# પ્રકાશિત પુસ્તકોની યાદી

- સુવર્ણાક્ષરીય કલ્પસૂત્ર (પ્રત) — સંસ્કૃત
- ઉપદેશપ્રાસાદ (પ્રત) ભાગ ૧ થી ૪ — સંસ્કૃત
- ચતુર્વિંશતિ જિન ચરિતાનિ — સંસ્કૃત
- પ્રમાણનયતત્ત્વલોકાલંકાર (મૂલ + અવચૂરિ) — સંસ્કૃત
- અધ્યાત્મ કલ્પદ્રુમ (મૂલ) — સંસ્કૃત
- અધ્યાત્મ સાર (મૂલ) — સંસ્કૃત
- પારમર્ષ સ્વાધ્યાય (મૂલ) — સંસ્કૃત
- શ્રી શ્રુતજ્ઞાન અમીધારા — સંસ્કૃત
- શ્રી જૈન ધર્મ પ્રકરણ રત્નાકર — ગુજરાતી
- ધાતુ રૂપાવલી — સંસ્કૃત
- ગુણવૈભવ પરમ વિભૂતિનો — ગુજરાતી
- સમ્યગ્દર્શન — ગુજરાતી

स्वेदं समुद्वहति जृम्भणमातनोति,
निद्रायते किमपि जल्पति वस्तुशून्यम् ।
आशां विलोकयति खं पुनरेव धात्रीं,
भूताभिभूत इव दुर्वदकः सभायाम् ।।

हैमविभ्रमने जो न भण्या तो
सभा वच्चे तमारी स्थिति केवी थई शके छे
एनुं रोचक वर्णन कंईक अलग शब्दोमां जुओ.

प्रस्वेदक्लिन्न शरीर ने नीकळे बगासा धडधडाट,
आवे झोका सडसडाट के कर्या करे बस बडबडाट ।
जूए दिशा–गगन–धरा जो व्याकरण नथी कडकडाट
करे सभामहिं दुष्टवादी भूत जेवो भडभडाट ।।

9 788196 560805

Suraj 0007